Shri Raghunath Temple MSS. Library,
JAMMU

No. १५६८

Title आख्यात वाद टिप्पणी

Author श्री रघुदेव भट्टाचार्य

Extent १० Age α

Subject न्याय शास्त्रं

आख्यातवादटिप्पनी

१५६८

१०५०

पत्रे ९.

आ॰ वा॰ टी॰ ॐ श्रीगणेशाय नमः ॥ प्रणम्य नीरदश्यामम् अद्भुतम् अरुणमन्दिरम् आख्यातवादसद्व्याख्या रघुदेवेन तन्यते ॥१॥ वैयाकरणमतं निराकर्तुं प्रथमतः स्वमतं व्यवस्थापयति आख्यात १
स्येति यत्नो वाच्यः यत्नत्वविशिष्टो वाच्यः यत्नत्वं शक्यतावच्छेदकमिति यावत् यथाश्रुते यत्नस्य व्यापारत्वेन गतत्वेन व्यापारशक्तिवादमतव्यवच्छेदाप्रतीतेः शक्यतावच्छेदकं चाख्या
तत्वम् तत्त्वं हि सम्बन्धेनाख्यातपदत्वम् यदि च रहि सम्बन्धेनाख्यातपदत्वं लकारे घञादिप्रकान्तेनैवाख्यातपदप्रयोगात् तथा च पचतिमित्यादावपि कृतिबोधापत्तिः न चापि
लकारस्थाने शत्रादेशेन रहि सम्बन्धेनाख्यातपदवत्तो लकारस्य सत्त्वादिति विभाव्यते तदा विशिष्यति पत्नस्तादिकमेव शक्यतावच्छेदकं बोध्यम् एतेन तद्धलकारसाधारणलत्व १
मेव शक्यतावच्छेदकमिति परास्तम् तस्यैवाभावात् भावे वा पचत्रिमादावपि कृतिबोधप्रसङ्गादिति तथा च यत्नत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति यत्नत्वावच्छिन्नवि
षयकरहि सम्बन्धघटिताख्यातपदत्वावच्छिन्ननिरूपितशक्तिविषयकत्वोतजन्ययत्नोपस्थितित्वेन हेतुत्वं कल्पनीयमिति ध्येयम् ननु प्रदर्शितकार्यकारणभावकल्पनेऽपि ह्याख्या
तपदाद्यत्नविषयकशाब्दबोधापत्तिरिति चेत् सम्भवमेव यदि पाकाद्यनुकूलयत्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तिबादिपदवित्ववाहिधात्वव्यवहितोत्तरत्वसम्बन्धेन पदी
ज्ञानस्य हेतुत्वं न कल्प्यते वस्तुतः श्रुताख्यातपदजन्ययत्नोपस्थितिकाले पाको यत्न श्रुतिनिराकाङ्क्षवाक्यात्पाकानुकूलयत्नविषयकशाब्दबोधवारणाय तादृशकार्यकारण
भावकल्पनाया आवश्यकत्वेनोपदर्शिताख्यातपदनिरूपितशक्तिज्ञानजन्ययत्नोपस्थित्या यत्नविषयकशाब्दबोधे जननीये पचतीत्यादावपि पदज्ञानस्य सहकारित्वकल्पनेनैव केव १
लाख्यातपदाद्यत्नविषयकशाब्दबोधवारणसम्भवात् केचित्त्वाख्यातस्य यत्नवाचकत्वे पाकगोचरनिरूपाख्येयत्नकाले चैत्रः पचतीति प्रयोगस्य योग्यत्वापत्तिः शुद्धावपत्तीति तन्न १
कृदपीमहि प्रत्ययभावातिरिक्तनिरस्याख्येयत्नमानाभावात् वस्तुतस्त्विदम्पाख्यायत्नाङ्गीकारेऽपि न क्षतिः यतः पचतीत्यादिवाक्यात्पाकानुकूलकृतेरेव शाब्दबोधो मन्मानिरूप्यते एष १
यत्नकाले पाकानुकूलकृतेरभावेन तदानीं तादृशप्रयोगस्य तथाविधप्रमात्मकबोधाजनकतया योग्यत्वं स्वपुत्पादमेवेति येनोपदर्शितापत्तिः स्यात् वह्नित्वमेवाख्यातपदशक्यतावच्छे ईश्वरकृतेरज नत्वात्=
ईश्वरो वेदं करोती॰ यत्नेलत्ता श्मसत्वप्रवृत्तौशक्तिः दकम् एवञ्च यत्नित्वं पामतेऽपि साधनत्वात् ज्ञानादिजन्यतावच्छेदककोटिप्रविष्टत्वेन सिद्धा याः प्रवृत्तित्वजातेरीश्वरीयकृतिसाधारण्येऽमानाभावेनेश्वरो वेदं करोतीति वाक्याच्छाब्दबोध
निर्वाहः परिचिन्तनीयः न च नन्वाख्यातस्य कृतौ लक्षणया नानुपपत्तिरिति वाच्यम् उपदर्शितरीत्या तादृशवाक्यजन्यशाब्दबोधस्य तत्र शक्त्यैव निर्वाहे लक्षणा कल्पनीया ऽप्रमाण्यत्वात् नवा १
ख्यातस्य यत्नत्वविशिष्टे शक्तत्वे चैत्रः पचतीत्यादिवदीश्वरः पचतीत्यादिप्रयोगापत्तिवारणाय वक्तव्यमाख्यातस्य प्रवृत्तित्वविशिष्टशक्तत्वस्यापि नेत्यमितिवाच्यम् अन्यथा पचतीत्यादिप्र
योगवदस्यापि वारणासम्भवात् तथा हि आख्यातस्य यत्नत्वविशिष्टवाचकत्वेऽप्यग्न्यापचतीत्यादिप्रयोगापत्तिरिष्टवत्तथाविधप्रयोगशाब्दा सत्तथाविधशब्दो वा तथाविधशाब्दज १
न्यप्रमात्मकबोधो वा नाद्यः कर्तृत्वप्रवृत्त्यविषयतादिरूपशब्दकारणसत्त्वेन तथाविधशाब्दस्य जननात् नान्त्यः तथाविधशाब्दबोधस्यापादकाभावात् योग्यताज्ञानमेवापादकमिति तन्न
शङ्कनीयम् यतस्तथाविधशाब्दबोधप्रसिद्ध्या तादृशशाब्दबोधं प्रति तादृशयोग्यताज्ञानत्वेन हेतुत्वकल्पनस्यानिष्प्रयोजनत्वात् ननु पाकानुकूलकृतिमांश्चैत्र इत्यादिशाब्दबोधं प्रति त
त्समानाकारयोग्यताज्ञानसाधर्मितावच्छेदकभेदेन हेतुत्वकल्पने गौरवात् समानधर्मितावच्छेदकतासम्बन्धेन तथाविधयोग्यताज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावः तथा च पाकानु
कूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन ज्ञानत्वेन हेतुत्वमिति योग्यताज्ञा योग्यताज्ञानत्वेन=
वैशादिश्यतावच्छेदे तास्मनि कृतिर्भवति नत्वात्मत्वावच्छेदे=२ न शाब्दबोधयोर्हेतुहेतुमद्भावे स्थिते तादृशसम्बन्धेन पाकानुकूलकृतित्वावस्तात्मन्येसत्त्वात् तत्तादृशबोधापत्तेः किं प्रमाणत्वांफलन्तः पाकानुकूलकृतिमान्नात्मेति शाब्दबोधापत्तिरि
ति वाच्यम् अवच्छेदकतासम्बन्धावच्छिन्नतादृशकृतिप्रकारताकशाब्दबोधं प्रति तथाविधयोग्यताज्ञानस्य हेतुतया कल्पनीयतया मायापचतीत्यादौ विशेषदर्शिनां तादृशयो १
ग्यताज्ञानविरहेण तथाविधप्रमात्मकशाब्दबोधापत्तेरशक्यत्वात् एवं चेश्वरः पचतीतिवाक्यजन्यतादृशबोधापत्तिवारणस्याप्यसम्भवत्वात् नैवेवमतीश्वरो वेदं करोतीति प्रयोगाद्बोधा

पाकानुकूल

अवच्छेदकतासंबन्धावच्छिन्नपाकानुकूलकृतिप्रकारताक=२

नुपपत्तिः ईश्वरेच्छेदकत्वासम्बन्धेन कृतेराश्रयत्वादिति वाच्यम् तत्र समवायसम्बन्धेन कृतिप्रकारकशाब्दप्रतीतेः तथाविधान्वयबोधज्ञानस्य हेतुत्वकल्पनात् ईश्वरः पचतीत्यादि

ईश्वरः पचतीत्यादौ गुरुत्वी ज्ञानस्य हेतुत्वकल्पनायाः २

तः तथाविधशाब्दबोधस्यानुत्पादेन तथाकल्पनायामसम्भवात् चर जवस्त्रामापचतीश्वरः पचतीत्यादिवाक्यजन्यतथाविधबोधेऽपि ज्ञापत्तिमङ्गीकुर्वतीमतमधिके
नु ननु यत्नत्वविशिष्टे आख्यातपदस्य शक्तौ किं प्रमाणमत आह पचतीत्यादिकृतेरित्यन्तं तत्क्रमेणेति शेषः सकर्मकाख्यातविवरणादिति इदानीं कारणमर्थकथनादिप्र
र्थः एवं चरितवाक्यस्योत्तरवाक्येनाथकथनं विवरणमित्यस्य तत्त्वलक्षणमिति भावः ननु कथं विवरणस्य शक्तिग्राहकत्वं शब्दविधयानुमानविधया वा नाद्यः पाककरो

रथो गच्छतीत्यादौ बाधकः

तीत्यादिविवरणस्य पाकविषयकयत्नमात्रबोधकत्वेन यत्ने आख्यातशक्तिबोधकतया तस्य शक्तिग्राहकविधया प्रमाणत्वासम्भवात् नान्त्यः साध्यहेत्वप्रयोगासम्भवा
दिति चेन्न आख्यातपदं यत्नत्वविशिष्टशक्तं बोधकं विना यत्नत्वविशिष्टवाचककरोतिप्रतिपादितार्थकत्वात् कृत्वविशिष्टशक्तपाकपदप्रतिपादितार्थपचधातुवत् यद्यद्विशि
ष्टबोधकपदप्रतिपादितार्थं तत्तच्छक्तमिति सामान्यव्याप्त्या विवरणस्य विशक्तिग्राहकत्वसम्भवात् न चैवं दृष्टान्तानुमानमप्रयोजकमत आह व्यवहारादिवेति बाधकं विना
यत्नत्वप्रतिसन्धानं विना इदं तद्धर्मविशिष्टवाचकमिति स्पष्टशक्तिग्रहात् समानेति शक्तिग्रहसम्भवादित्यर्थः तथा च विवरणहेतुकानुमानस्य शक्तिग्राहकत्वे तत्र
प्रत्याख्यवहारहेतुकानुमानस्यापि शक्तिग्राहकतया रपि शक्तिलोपप्रसङ्ग इति भावः ननु विवरणेन यत्ने शक्तिग्राहकस्य यन्नान्यलभ्यत्वप्रतिसन्धा
नवाधीना प्रकृते तु पाकः यत्नत्वः पाकत्वादियन्मात्रादपि यत्नस्य लाभसम्भवेनान्यलभ्यत्वात् अन्यलभ्यस्याख्यातपदप्रयोज्यत्वे किमपराद्धं धर्मिणेत्यत आह किं करोतीत्या
दि यत्नप्रश्ने यत्नत्वविशिष्टजिज्ञासितसम्बन्धबोधकशब्दप्रयोगे पचतीत्युत्तरस्योत्तरकाले भावपचतीतिवाक्यप्रदर्शितप्रश्ननिवर्तकत्वस्य यत्नार्थकत्वं विना यत्नत्वविशिष्टपा

ज्ञानाद्यधर्मावच्छिन्नः

कसम्बन्धबोधं विनाऽनुपपत्तेः भावः यद्धर्मविशिष्टे यद्धर्मावच्छिन्नस्य सम्बन्धो यत्प्रश्नवाक्यात्प्रतीयते तद्धर्मविशिष्टे तद्धर्मव्याप्यधर्मावच्छिन्नसम्बन्धे तदुत्तरवाक्यान्वयीयते तदात
दुत्तरवाक्यं तत्प्रश्ननिवर्तकं भवति यथा नृत्वविशिष्टे जिज्ञासितसम्बन्धबोधके कस्यायं दृष्टनिवृत्ते त्वविशिष्टे दानजन्यत्वबोधकदेवदत्तस्येत्युत्तरवाक्यं निवर्तकं प्रकृते चाख्या
तस्य यत्नत्वविशिष्टवाचकत्वाभावे पचतीति वाक्यान्मात्रानुकूलव्यापारबोधाभ्युपगमे यत्नत्वविशिष्टे पाकसम्बन्धबोधाभावान्न तादृशस्य यत्नत्वविशिष्टे जिज्ञासितसम्बन्ध
बोधकं किं करोतीति प्रश्नवाक्यनिवर्तकत्वानुपपत्तेः यत्नस्याख्यातार्थत्वे यत्नत्वविशिष्टशक्तिरावश्यकीति ननु रथो गच्छतीत्यादावाख्यातस्य यत्नबोधकत्वासम्भवेन व्यापारे शक्तिर
वश्यकीत्यत आह अचेतनेष्विति अचेतनार्थकशब्दोपस्थाप्यविशेष्यकबोधजनकस्येत्यर्थः अनुकूलव्यापार इति अग्रानुकूलत्वोक्तौ गमनस्यैतेन संयोगोऽन्वयस्फोरणाय तत्र तन्दृष्टे व्यापारे

नापि तत्तुल्यतयाऽर्थान्तरात् तत्र गमनस्यान्वये पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधाच्च ननु व्यापारे लक्षणा वादिमते दूषयति अन्वदीयेति रथगमनानुकूलनो
दनाद्यसंयोगादिमति निष्ठत्वरूपेण गुरुत्वं रथो गच्छतीत्यत्र योगादिमर्थः तथा चाख्यातस्य व्यापारे लक्षणा वादिमते नोदनाद्यनिष्ठत्वरूपेण गमनानुकूलनोदनाद्यसंयोगादिरूपव्या
पारत्वेन रथो गच्छतीत्यादिप्रयोगोपपत्तिरिति भावः ननु तादृशगुरुरूपेण तथाविधप्रयोगापत्तिर्मतः तथाविधवाक्यस्य प्रमात्मकबोधापत्तिः सा च तादृशगुरुरूपस्य विशिष्टतादृशा
याश्रद्धावत्वेऽन्यथा वा अन्वये रथापत्तिः आह तत्कालानभिधानेन तादृशव्यापारत्वबोधाप्रसिद्ध्याऽप्रमासम्भवः स्यात् अत आह रथो गच्छतीत्यादि केचित्तु सामानाधिकरण्यसम्बन्धेन तु धर्मानग
मनविशिष्टे आख्यातस्य लक्षणाकल्पनायां प्रदर्शितापत्तिरित्यत आह रथो गच्छतीत्यादौ कृतिव्यापारयोरित्यादि अनुकूलेति बाधव्यापारलक्षणाकल्पनागौरवाभावात् चि
कृतिव्यापारयोर्बाधे न कृतिव्यापारयोः प्रतीत्यसम्भवादित्यर्थः ननु जानातीत्यादावाख्यातस्य लक्षणाकल्पने जानातीति प्रयोगकाले ज्ञानवति मैत्रे मैत्रो ज्ञानं जा
नातीति प्रयोगापत्तिः एककालीनत्वसम्बन्धावच्छिन्नतदाश्रयत्वस्य तदानीं मैत्रेऽपि सत्त्वात् तदवच्छिन्नाश्रयत्वे लक्षणायास्त्वनेनेत्यनुसरतीत्यतो रथं तत्र पतया व्यापारे लक्षणाकल्पनमेव

आ॰ का॰ टी॰ २

त्यायोति प्रसङ्गः स्यात्स्यदर्शितरीत्यावाराणसी यत्नान् यदि चाख्यातस्याश्रयत्वेनाश्रयत्वसामान्येन तण्णोजानातीत्यादावाश्रयत्वत्वरूपेण समवायसम्बन्धावच्छिन्नाश्रयत्वस्यैव बोधस्त
थैव कार्यकारणभावकल्पनात्तथापि व्यापारत्वलक्षणापेक्षया गौरवापत्तेरिति मन्तव्यम् गत्यादिमत्वेति ग्राम्यपुत्रस्य [illegible] धियैव कार्यकारणभावे दिनाद्यावाद्यपि गृहः साऽत्र पदे
त्वव्यापारत्वावच्छेदः तथा चानुभवविरोधेनागत्या तत्तत्सम्बन्धावच्छिन्नाश्रयत्वेन तद्वत्तया विषयतासम्बन्धेन कार्यकारणभावो वाकल्पनीय इति भावः केचित्तु तद्रूपप्रदर्शितस्यलेशव्यापा
रस्यैवाश्रयत्वस्याप्रतीतेरलं लक्षणायेत्यत आह गत्यादिमत्वेनेत्यादि नन्वाख्यातस्य मुख्यार्थबाधस्थले सर्वत्राश्रयत्वलक्षणाकल्पनेन सम्भवति हरीतनृपपत्नीत्यादौ तत्प्रतीत्यस
म्भवान् हट्टस्य न हत्वेन नाशाश्रयत्वाभावात् प्रतियोगितासम्बन्धेन नाशतावच्छिन्नप्रतियोगितायोगित्वात्तादृशसम्बन्धे नहि तत्तादृशविरोधेन न हि तस्य प्रतियोगित्वासम्बन्धे नाशाश्रय
त्वाङ्गीकारे तत्तत्लोकवामतियोगित्वस्य लक्षणाकल्पनस्यैवोचितत्वादित्यत आह नश्यतीत्यादि नित्वेहेति गत्यादिमित्यर्थः नृपदर्शितबहुप्रयोगसङ्गतत्वमप्यङ्गीकरणीयं वक्ति मितिनक
स्य ईशितेति यत्नत्वरूपतत्वगृहकर्ता मात्रावच्छेदकसम्बन्धे नतत्तत्सम्बन्धप्रवृत्तिनाश्रयतावच्छिन्नशक्तिकल्पने गौरवतानाम प्रतिबन्धकस्य जलाञ्जलिः प्रसज्येत न चाश्रयत्वत्वस्यातिरिक्त
त्वमभ्युपेयमतदवच्छिन्नशक्तिकल्पने बाधकाभावश्चेति वाच्यम् नहि व्यापारत्वमप्यतिरिक्तमेकमभ्युपेत्यतदवच्छिन्नविषयिकशक्तिकल्पनस्योचितत्वात् तच्चोपपत्तिः तथा सति विनिगमनाभा
वात् अन्यत्र तत्तदवच्छिन्नशक्तिकल्पनामपेक्ष्य लाघवात्तत्प्रयत्नत्वावच्छिन्न एवाख्यातस्य शक्तिकल्पने बाधकाभावात् एतेन समवायत्वमतिरिक्तं स्वीकृत्य तदवच्छिन्न आख्यातस्य शक्ति
र्यत्नत्वलक्षणा [illegible] व्यापारं वर्तितं विनिगमनाविरहेण तत्तदन्यत्रयत्नावच्छिन्नशक्तिकल्पनापत्तेः गौरवं तस्य जागरूकत्वादित्यपि कमन्यदर्थेवेति भावः नन्वेवं जानातीत्यादावाश्रयत्वेनि
रूढलक्षणाकल्पने निरर्थकमेव तत्राश्रयतासम्बन्धे नचैत्रस्यान्वयात्तु यत्नस्य त्वयेनैवोपदर्शितात्रयत्वोपपत्तेः तत्राश्रयत्वप्रकारकानुभवस्यसिद्धत्वमिति चिन्तामणिकारमतं दूषणमाह
चैत्रः पचतीत्यादि अन्वयबोधादिति चैत्रः पचति तण्डुलमित्यादौ कर्मतासम्बन्धेन पाकेन तण्डुलस्यचैत्रः पचति तण्डुलमित्यत्र पाके कर्तृतासम्बन्धेन चैत्रस्यान्वयानुभवाभावादित्यर्थः धात्व
र्थप्रतिपुरुषकोपपत्यादि धात्वर्थतामार्थयोरभेदातिरिक्तसाक्षात्सम्बन्धेनान्वयबोधस्याव्युत्पन्नत्वेनेत्यर्थः अत्र चस्तोकं पचतीत्यादावभेदसम्बन्धेन धात्वर्थे नामार्थस्तोकस्यान्वयाद्व्युत्पत्ति
भङ्गः एतेनाभेदातिरिक्तेति नञ्तत्र विशेषणविभक्त्यर्थभेदार्थः तत्रैव स्तोकस्यान्वयोऽभ्युपेयते तथाच नञ्भेदातिरिक्तत्वविशेषणानुपादाने पि नदोषः नामार्थप्रत्ययार्थयोरेवान्वय
बोधस्यतत्रोत्पत्त्यादिति चेत्सत्यम् विशेषणविभक्तेः साधुत्वेनाभेदार्थकत्वासम्भवात् तस्याश्रभेदार्थकत्वेपि तत्प्रविशत्किमनुसन्धानस्य स्तोकपाकस्त्यादावभेदसम्बन्धे न पाके स्तो
कान्वयबोधस्यानुभवसिद्धतया नत्रैवाभेदातिरिक्तत्वविशेषणस्यावश्यकत्वात् न च तत्प्रविभक्तेरनुसन्धाने विनाप्यभेदबोधानङ्गीकारे [illegible] राजपुरुष इत्यादौ राजपदस्य राजसु
वन्धितिलक्षणायान्त्रापि तथावश्यकत्वादिति तण्डुलं पचतीत्यादौ पाके तण्डुलकर्मत्वस्यैव कर्मतासम्बन्धेन तण्डुलस्यापि बोधोऽस्य [illegible] पाक्या वन्ध्यापाकतादिति तण्डुलंप
चतीत्यादौ पाके तण्डुलकर्मत्वस्यैव कर्मतासम्बन्धेन तण्डुलस्यापि बोधाभ्युपगमे व्युत्पत्तिभङ्गः प्रसङ्गवारणाय सप्ताविति नामार्थधात्वर्थयोरन्वयविभक्त्यर्थातिरिक्तेत्यर्थः नन्वेवंतत्या
पि नकुलं त्रिभक्तयोरैक्यमत्र विपर्यये बलवदनिष्टानन्तरबन्धित्वविधिसाधनत्वान्वितं तथा भावस्य धात्वर्थेकृत्तत्र भक्तलादावन्वयान्नैत्रैव व्युत्पत्तिभङ्गः एवञ्च परिहार इति चेन्नियमात
र्यातिरिक्तत्वमपि नाम्नि विशेषणीयं स्वीकुरुतां वा नत्वपदस्याभाववाचित्वलक्षणा तस्याभेदसम्बन्धेन तत्र धात्वर्थेऽन्वय इति सम्बन्धमर्यादयेत्यादि चैत्रोजानातीत्यादौ धात्वर्थनामार्थयोः
संसर्गमर्यादया आश्रयत्वस्याभानासम्भवादित्यर्थः तथा चैत्रो [illegible] धात्वर्थविरोधेन नामार्थनिष्ठाभेदातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन धा २
त्वर्थप्रकारतावच्छिन्नप्रतिविभक्तिपदनिरूपितत्वनिरूपितज्ञानजन्योपस्थितेः प्रकारतासम्बन्धेन हेतुत्वं कल्पनीयम् एवं धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन धात्व
र्थप्रकारतावच्छिन्नप्रत्ययनिरूपितचैत्रो जानातीत्यादावाश्रयत्वसम्बन्धेन धात्वर्थतानस्य नामार्थेन बोधसम्भवतीतिभावः अत्रचिन्तामणिकारमतानुयायिनः चैत्रः पचति तण्डुलमित्यादौ

आख्यातनिरूपितविभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबन्धेन हेतुत्वं

स्वाभेदादिरिक्तसंबंधावच्छिन्नः

यत्र घटत्वादिधात्वर्थनिष्ठप्रकारतानिरूपित
विशिष्यतावच्छेदकः स च व्याख्यानपदजनितोपस्थितेः प्रकारः

आश्रयत्वे

उपस्थितस्याधिकरणं घटत्वादि

ता

आत्मत्वावच्छेदेन

ज्ञानार्थः

कर्मिता सम्बन्धेन तन्न एव तस्य पाके ऽन्वयबोधवारणाय नामार्थनिष्ठतत्प्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितशक्ति-
ज्ञानजन्योपस्थितेः प्रकारतासम्बन्धेन हेतुत्वकल्पनमस्तु धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तथाविधोपस्थितेर्हेतुत्वक-
ल्पने तन्निष्ठमालोकनयानादरणीयम् तथा च चैत्रो जानातीत्यादावाश्रयतासम्बन्धेन धात्वर्थस्य नामार्थान्वयबोधे बाधकाभावादाश्रयत्वेऽपि व्याख्यानस्याभिरूढलक्षणाकल्पनं किमिति न
जानीमहे तत्र व्याख्यानस्याश्रयत्वे लक्षणाङ्गीकारे जानातीत्यादावाश्रयत्वप्रकारकबोधानुभवापलापप्रसक्तिश्चेत् प्रायः स्वमात्र ... बाधकसद्भावसंभवात् अत्र विवदामहे
तत्त्वः जानातीत्यादावाख्यातस्य कृत्यादौ स्वारसिकलक्षणाज्ञानकाले ज्ञानीयो घटादिरिति शाब्दबोधोपपत्तये घटादिविशेष्यकज्ञानप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वर्थस-
मभिव्याहृताख्यातज्ञानजन्यघटाद्युपस्थितेर्हेतुत्वकल्पने घटत्वपटत्वादिभेदेन तत्कार्यकारणभावकल्पनापत्त्या गौरवात् तदपेक्षया तद् निवेशप्रसिद्धतानिष्ठप्रकारतानिरूपितविशे-
ष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रत्याख्यानपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासम्बन्धेन हेतुत्वकल्पने लाघवात् तत्र चैतादृशकार्यकारणभावकल्प-
चैत्रो जानातीत्यादावाश्रयतासम्बन्धेन चैत्रस्य धात्वर्थस्यान्वये तत्राख्यातस्याश्रयत्वे लक्षणावश्यकीति यत्र घटत्वपटत्वादिकमभिवेश्य तथाविधकार्यकारणभावकल्पने ज्ञानीयो घट इति
योग्यताज्ञानबलात्तथाविधाख्यातपदजन्यघटाद्युपस्थितिदशायां ज्ञानीयो घट इति शाब्दबोधस्य समवायसम्बन्धेनोत्पत्तिर्दुर्वारा यदि च विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्याशाब्द-
बुद्धौ योग्यताज्ञानयोरपि कार्यकारणभावः कल्प्यते तथापि भिन्नविषयकानुमित्यादिसामग्रीभावस्य प्रकारतया तदानीं तथाविधशाब्दबोधापत्तेस्तन्निवृत्तये पिङः समाधेयत्वेन
घटत्वपटत्वादिकं निवेश्य तथाविधसमभिव्याहारज्ञानजन्योपस्थितिनिष्ठहेतुत्वेः कार्यकारणभावकल्पनमित्यत्र किं बाधकं चैत्रो जानातीत्यादौ चैत्रे आश्रयतासम्बन्धेन ज्ञानस्या-
न्वयेऽपि तत्र उपदर्शितशाब्दबोधपदजन्योपस्थित्या तथाविधपृथक्पृथक्कार्यकारणभावकल्पनेन तद्विषयकत्वेः सह विनिगमनाविरहेण कार्यकारणभावानन्त्यात्कारणतावच्छेदकगौर-
वाच्च तदपेक्षया घटत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति घटत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानत्वेन हेतुत्वान्तरकल्पनं सम्यक् यापत्तानान् तथा हि विरोधसामग्री-
वेन ज्ञानीयो घट इति शाब्दबोधजननीयेच्छाधात्वर्थसमभिव्याहृताख्यातपदजन्योपस्थितिविशिष्टघटत्वप्रकारकज्ञानादेः सहकारित्वकल्पनीयम् घटत्वप्रकारकज्ञाने तथाविधोपस्थि-
तिविशिष्टत्वं च प्रकारतासम्बन्धेन यत्राधिकरणे तन्निरूपितविषयतासम्बन्धावच्छिन्नतन्निरूपसामानाधिकरण्यसम्बन्धेन तथा च ताहशाख्यातपदजन्योपस्थितिकालेन
तथाविधसामानाधिकरण्यसम्बन्धेन ताहशाख्यातपदज्ञानजन्योपस्थितिविशिष्टं घटत्वप्रकारकज्ञानं तत्त्वरूपसहकारिभावे तद्विरोधसामग्रीभावस्य प्रकारतया बलादासानि ज्ञानीयो घट इ-
तिशाब्दबोधापत्तिः तत्र तथापि तत्रूपाख्यातपदज्ञानजन्योपस्थितिकाले घटत्वेन तत्त्वविरोधसामग्रीभावबलात् ज्ञानीयो घट इति शाब्दबोधापत्तिर्दुर्वारैवेति वाच्यम् घ-
टात्मसमवेतस्याप्याख्यापत्तिवारणार्थं तदात्मसमवेतत्वावच्छिन्नप्रतियोगितासम्बन्धेन तदात्मत्वेन पर्याप्तिसम्बन्धेन तत्समवेतत्वेन ताहशरूपोपदर्शिताख्यातपदजन्योपस्थितिविशि-
ष्टत्वं तत्स्वरूपीयघटत्वज्ञानत्वावच्छिन्नविशिष्टत्वं तदात्मविशिष्टविरोधसामग्रीभावस्य ज्ञानीयो घट इतिशाब्दबोधसामग्रीत्वाभ्युपगमे तत्कथमभिव्यपपत्तिभावात् घटत्वज्ञानत्वाव-
च्छिन्ने विशिष्टत्वं तदात्मसमवेतकालीनत्वसम्बन्धेन विरोधसामग्र्यभावेन तदात्मविशिष्टत्वं तदात्मविशिष्टोभयविशिष्टसामानाधिकरण्यसम्बन्धेन बोध्यम् तथा च ज्ञानत्वाव-
च्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रकारतासम्बन्धेन तथाविधाख्यातजन्योपस्थितेर्हेतुत्वस्य निर्दुष्टत्वमयानाहशाद्धेतुत्वाभावात्
चैत्रो जानातीत्यादौ चैत्रे आश्रयतासम्बन्धेन ज्ञानान्वयबोधासम्भवेन न आख्यातस्याश्रये लक्षणावश्यकीतिमारत केचित्तु चैत्रो जानातीत्यादौ चैत्रे आश्रयतासम्बन्धेन ज्ञानान्वया-
नुपपत्त्या श्रितमाख्यातस्य कृतिशक्यापि चेत्रः पचतीत्यादावपि स्वाश्रयकृतकृतिमत्त्वसम्बन्धेन पाकान्वयबोधस्यानुभवसिद्धत्वात् यदि च धात्वर्थस्य नामार्थेऽन्वयोऽसम्भवः

ग्रा॰ टी॰ २

तितत्पाविषयबोधस्यासम्भवेनाख्यातस्य कृतिशक्तिरावश्यकीतिविभाव्यते तदा ज्ञानानीत्यादावप्याश्रयत्वेन लक्षणाकल्पनमा[...]पकमित्याहुः तन्मतदर्शितविवरणमवलादाख्यानस्य
त्ववाचकत्वं तदेवाख्यातपदे वाचककृतो यत्नार्थकत्वं तदेवत्वत उतः तत्स्वव्यापारत्वविशिष्टविशेषणांशे कत्वेन निवायकाभावादित्यत[...] कृतस्येत्यादिक्रियाजन्यत्वेति संयोगरूपव्यापारजन्य
त्वप्रतिसन्धानाविशेषेपीत्यर्थः तथा च कृधातोर्व्यापारार्थकत्वे पटाङ्कुरादेर्व्यापारजन्यत्वप्रतिसन्धानकाले कृतिजन्यत्व[...]तसन्धानात्प्रतिसन्धानाभावात्परः कृतः अङ्कुरोत्पन्न इति
व्यवहारः सर्वानुभवसिद्धो न स्यात् तन्मते तदाङ्कुरे व्यापारजन्यत्वज्ञाने सत्वे तद्व्यापारजन्यत्वरूपपदार्थत्वज्ञानाभावादिति भावः कृधातोर्यत्नार्थकत्वे पूर्वमुक्तमाह ज्ञानादिवदिति
ज्ञानादेर्यथाश्रयबोधकत्वत्वादसमभिव्याहृतधात्वपराज्ञानाद्यर्थरूपेण बोधः तद्वत्कर्मत्वप्रत्ययप्रपन्नो[...]कृत्यादसमभिव्याहृतकृधात्वपदात्कृत्याश्रयत्वेन बोधव
त्यये सचकृधातोर्यत्नार्थकत्वं विना न सम्भवतीति तत्प्रत्ययत्वार्थकत्वेनावश्यकमिति इदमत्र बोध्यम् तज्जादिपदस्य कर्त्र[...]र्थक्रियानुकूलव्यापारजादिपदस्य कृत्योः कृत्याश्रयत्वेन क्रियान्वि
मितिवाच्यम् तथा सति प्रकाशे चैत्रस्य मादौ चैत्रे तदाश्रयार्थकृतेः समवायसम्बन्धेनान्वयबोधासम्भवात्प्रामार्थं पात्वर्थयोरिव[...]मार्थयोरप्यभेदेनेति रिक्तसम्बन्धेनान्वयबोधस्यास्मन्मतेना
त स्वमव्यवहारः कर्मत्वमिव्याहृतिनिराकाङ्क्षत्वात्रापि कर्मतायामाश्रयेण तासम्बन्धेन तदान्वयबोधप्रसङ्गात् अत्र तद्बोधानार्थत्वेनास्तीति तन्न सम्भावनीयं स्यादत्र तेन तत्स्यापि नामत्वा
त तदाङ्कुरमिषृक्तः स्यादत्र मित्रनाममित्यादिना तान्तात्यादौ तत्कतेस्तोनाङ्कुले व्याभावे तु ज्ञानाश्रकृतत्वात्प्रयबोधासम्भवादविषयवाचकधात्वसमभिव्याहारस्थलेत्वत्र
प्रयत्नेत्वात्प्रकर्षपकौन्नत्र ज्ञानेन मादौ रवो ते तल्लाङ्गोकारेपि कर्मत्वप्रत्यय: शयनेन तत्रात्रयबोधोस्त्विति कृधातोर्यत्नार्थतैवेति चेन्न तथा सति कर्मत्वत्वपात्वेनैव योग्यत्वाप्रसङ्गे: तेस्यार्थेय
र्थेतत्सदाद्यापारानुकूलकृत्याश्रयबोधापत्तेश्च तच्च तत्कृधातुपदे तथार्थयाहकमितिवाच्यम् प्रकृत्यर्थविनत्स्वार्थबोधकत्वेन प्रत्ययानामिति [...]त्वेतिरिति तत्कर्तृपदात्कृत्याश्रय
बोधस्य सम्भवतितदेव कृजोयत्नार्थकत्वमायातितदेव तन्मतदाक्रियाश्रयस्य तदनुकूलव्यापाराश्रयस्य च बोधस्यैवाङ्गीकारादित्यतआह क्रियेत्यादि कृधातोः क्रियार्थकत्व
मभ्युपेत्य कर्तृपदात्क्रियाश्रयबोधाङ्गीकारे क्रियाश्रयमात्रे कर्तृत्वव्यवहारः स्यात्तत्र सक्रियानुकूलव्यापारार्थकत्वमभ्युपेत्य कर्तृपदात्तदाश्रयव्यापाराश्रयबोधाङ्गीकारेस्तु कारकमात्रे कर्तृ
त्वव्यवहारः स्यात्कारकमात्रस्येव तथाविधव्यापाराश्रयत्वादिति भावः कुतोव्यापारेशक्तिवादिनी मांसकः प्रत्यवतिष्ठते यदपीति अङ्कुरः कृत इति प्रयोगस्य कृजो यत्नार्थकत्वेपी सुरी
यकृतिमादायसम्भवेन तस्य व्यापारार्थकत्वसाधकत्वाभावाच्चादाह बीजादिनेति तथा च कृजो व्यापारार्थकत्वं विना बीजादिकारणकव्यापारजन्याङ्कुरे तन्निबोधजनकस्य बीजा
दिनाङ्कुरः कृत इति प्रयोगस्यासम्भवात्तस्य तदभिधायकत्वमावश्यकमिति भावः तन्न तथा सति कारकमात्रे कर्तृत्वव्यवहारोस्याकपरीहारमाह कर्तृपदे चेति अत्र बहुव्रीहिसमासेन
तस्याश्च व्यापारकत्वमर्थः पदपदं च वाक्यपरम् तथा च कर्तृरूपवाक्यघटकस्य कृजन्तस्यार्थः यदीति वस्तुतः कारकमात्रस्य कर्तृपदार्थत्वेपि तन्निर्विवादः विवक्षातः कारकाणि भवन्तीति
शाब्दिकसूत्रमतेरेतावतापि प्रसङ्गभङ्गकत्वादिति भावः तत्र कृधातोरत्र संयोगविभागादिरूपव्यापारस्यानुकूलतया पत्रसाधनाश्च व्यापारशक्तत्वमेवोचितं पूर्वपदर्शितस्थलेत्वव्यापारेलक्षणा
ङ्गीकारात्र तदुपपत्तिरितिचेन्न वृक्षभङ्गस्थलेषु तथाप्रयोगाभावेन तत्र शक्तियाहकाभावात् अन्यथाप्यप्रदानलक्षणायाः कर्तृचिह्नद्बोधसम्भवेन तस्यापि तत्र शक्तिकल्पनास्यादिति नाकि
ञ्चिदेतत् कृधातोर्व्यापारवाचकत्वे तत्र तस्य त्यागात्तत्स्यापि तदाचकत्वमावश्यकमापद्येत एवं चेति कृधातोर्व्यापारशक्तत्वे कृत्यनीतिविवरणदेयन्त्वाविशिष्टेप्याख्यातस्य शक्तिकल्पकः २
त्वाभावे चेत्यर्थः अचेतनेपीति काष्ठादावपीत्यर्थः बाधकं विनेति व्यापारेख्यातस्य शक्तिकल्पने बाधकं विनेत्यर्थः गौरवत्वायोगादिति व्यापारेख्यातस्य लक्षणाकल्पनाया
अन्याय्यत्वादित्यर्थः जनकव्यापारश्चेति शाकातावत्केदककोटौ जनकत्वप्रवेशे सत्यपि च तीत्यादिनाकाजन्यधात्वबोधे जनकत्वस्य प्रकारतया भानात्तव्यतमानाभिप्रायेण तदर्थ इति
ख्याख्यानपदार्थैरित्यर्थः तत्रात्र्यसुरजनकत्वमपेक्ष्य एवकालेवृत्तित्वमात्रं शक्यतावच्छेदककोटौ निवेशनीयं लाघवादित्यत आह तद्गुलेति नातिप्रसङ्ग इति तद्गुलाङ्गीकारेनीतिप्रयो

क्रियानुकूलः

यत्रच्छन्नत्वजनकत्वं तत्र व्यापारतापाकादौ तत्त्वं तदा तत्रैव पाकादिः =

गकालावच्छिन्नत्वेन तण्डुलान् पचतीति प्रयोगापत्तिरित्यर्थः तथा चोपदर्शितानुपपत्तिवारणाय गुरुत्वेऽप्यनुगतानुवृत्तयावत्तद्व्यापत्तिसिद्धनियतपूर्ववर्त्तित्वरूपजनकत्वस्यैवावच्छेदकत्वमुपदर्शयितव्यतावच्छेदककोटौ निवेशनमुचितमिति भावः तद्वीति व्याख्यानस्य यत्नत्वविशिष्टवाचकत्वेनेत्यर्थः यत्नाविनाभूतेत्यादि यत्नजन्यत्वव्याप्यः पाकादिक्रियाविशेषः तेन हेतुनात्र कारणीभूतस्य यत्नस्य अनुमानादित्यर्थः अत्र पाकादिक्रियाधारत्वे तण्डुलीयत्वेन तदात्मस्य सम्बन्धस्य सप्त्याप्यतावच्छेदकत्वमभ्युपेत्य तथा च पाकोद्यत्नव्याप्यः पाकादिरनुमानात्ताके यत्नजन्यत्वस्य सिद्धिकालेऽतस्य विनिवेशनतया यत्नेऽपि पाकजनकत्वक्रियोपचरितात्पादौ पाकजनकयत्नाद्यनुभवस्य निर्वाह इति भावः नन्वाख्यातस्य व्यापारवाचकत्वे पचतीत्यत्र पाकजनकयत्नवानिति विवरणासङ्गतिरित्यत आह पचतीति तात्पर्यविवरणमिति तात्पर्यविषयीभूतार्थविवरणमित्यर्थः ननु यादृशवाक्यस्य पदाद्वा किं तत्तदर्थस्य तस्य तद्व्याधादृशार्थस्य बोधः स एव तत्साकाङ्क्षत्वेऽपि तात्पर्यविषयीभूतः प्रकृते च पचतीत्यादिवाक्याद्धटकीभूतपदात् तु यत्नादेर्बोधकत्वं नन्वत्र तात्पर्यविषयत्वमितिवाच्यं धर्मोऽस्तीति वाक्यस्यैतन्मते योज्यात्वमिति विवर्णीभूतत्वहिंतात्पर्यकत्वस्य च मीमांसादिवाक्यस्यापि स्वप्रयोज्यात्वमिति विषयीभूतयत्नतात्पर्यकत्वसम्भवात्तात्पर्यं चास्माद्वाक्याद्वेतदर्थबोधाभावविमादिवाकेनाखिलप्रमाणापत्तेश्च प्रयोजनत्वप्रकारकवचनदर्थबोधोत्पत्तिरिति नन्वविवरणस्य परम्परातात्पर्यविषयीभूतार्थपरत्वकल्पनेऽसर्वतन्त्रासम्भवेन शक्तिक्रियाशकनत्वस्य तत्पदस्यादतस्त्वाह अन्यथेति अन्यलभ्यार्थस्यापि विवरणाद्युक्तिकल्पनेत्यर्थः तथा च यत्नाख्यलभ्यत्वनास्तित्वेऽपि विवरणस्य शक्तिक्रियारूपकत्वमायासतीति भावः एवमिति नन्वोपदर्शितानुमानेन पाकजनकयत्नानुभवनिर्वाहेऽपीत्यर्थः यत्नस्येति पाकजनकयत्नस्येत्यर्थः नन्वनुमानादुपस्थितेऽतथाविधयत्नेऽप्याख्यातोपस्थापितवर्तमानत्वस्यैककालिकशाब्दबोधोपपत्तेरत आह तस्येति अपदार्थत्वात् प्रकृतपदाद्यनुपस्थितत्वात् तथा च पदाद्यनुपस्थितार्थस्य शाब्दबोधाविषयत्वनियमेन तत्पाकत्वेनान्वयसम्भवादिति भावः नन्वन्वयबोधकपदसमभिव्याहारं विनाप्यविधिबोधोऽङ्गीकार्य इत्यत आह अयमिति जातावतिप्रयोगत्वानीमादावित्यर्थः सुबन्तमादिति शाब्दबोधे पदजन्यपदार्थोपस्थित्योरनुस्तादृशकार्यकारणभावस्यासिद्धत्वादित्यर्थः तथा च जानातीत्यादावाख्यातेऽवर्त्तमानात्वयवारणार्थं विशेष्यतावच्छेदकतासम्बन्धेनाश्रयत्वोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञानजन्यवर्त्तमानत्वप्रकारकशाब्दबोधं प्रतिप्रकारतासम्बन्धेनाख्यातनिरूपितज्ञानजन्योपस्थितेर्हेतुत्वकल्पनेनेतरयोग्यतीमादौ धात्वर्थवर्त्तमानत्वान्वयवारणार्थं विशेष्यतावच्छेदकतासम्बन्धेनव्यापारोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञानजन्यवर्त्तमानत्वप्रकारकशाब्दबोधप्रति ख्यातपदनिरूपितवृत्तिज्ञानजन्यव्यापारोपस्थितेः प्रकारतासम्बन्धेन हेतुत्वकल्पनेनच तत्राप्याह तत्पदार्थेषु त्वेवर्तमानत्वान्वयबोधासम्भवइति भावः नन्वविशेष्यतासम्बन्धेनव्यापारोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञानवर्त्तमानत्वप्रकारकशाब्दबोधप्रति यत्नपदजन्योपस्थितेरपि विशेष्यतासम्बन्धेनातिरिक्तहेतुताकल्पनान्नानुपपत्तिरिति चेदत्र तादृशातिरिक्तकार्यकारणभावकल्पनापेक्षया व्याख्यातस्य यत्नत्वविशिष्टएव कल्पनायत्नवी यस्त्वात न त्वयं कालः पाकजनकवर्त्तमानयत्नव्याप्याकजनकवर्त्तमानव्यापारवत्त्वादित्यनुमानान्यचतीत्यादौ पाकजनकवर्त्तमानयत्नानुभवोपपत्तिरित्याशङ्कां निराकरोति नचेति यत्नविनिगमेऽपीति तथा च व्यभिचारोद्धाराभिप्रायसम्भवेन तथाविधानुमितिर्न सम्भवतीति भावः ननु तथाविधवर्त्तमानयत्नविशिष्टएककालिकविशेषणतासम्बन्धेन तादृशव्यापारस्य हेतुत्वमङ्गीकार्यमतो नोक्तानुपपत्तिरित्यत आह धर्मिविशेषे चेति चैत्रादिव्यक्ति हृतिनाचेत्यर्थः ननु चैत्रस्तथाविधवर्त्तमानयत्नवान् तथाविधव्यापारवत्त्वादित्यनुमानाच्चैत्रे वर्त्तमानयत्नानुभवनिर्वाहो भविष्यतीत्यत आह तत्राधिकरणेति तथाविधयत्नव्यधिकरणकाष्ठादिव्यापारस्यापि कार्यः चैतन्याविनाभूतेति चैतन्यव्याप्येत्यर्थः हेतुत्वस्वरूपकथनपरं न तु हेतुतावच्छेदककोटौ निवेशितस्य तन्निवेशप्रयोजनाभावादिति शोभनादेरित्यादि न च सोऽन्दर्याऽपरपर्यायो भनविशिष्टतथाविधव्यापारस्यैव तत्र तथाविधवर्त्तमानयत्नानुमापकत्वमुपपादनीयमिति वाच्यम् काष्ठादेरपि सौन्दर्यसम्भवेन तथाविधविशिष्टहेतुत्वसम्भवे व्यभिचारस्य दुर्वारत्वात् तत्तथाविधयत्नविशिष्टसमवायादेर्हेतुतावच्छेदक

वर्त्तमानत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकं तात्पर्यमेव तथाधातूपस्थितेः प्रकारः —

वैत्रः पाकजनकवर्त्तमानयत्नवान् पाकजनकचैत्रसमानाधिकरणवर्त्तमानव्यापारवत्त्वात् अत्र चैत्रव्याप्यत्वेन निवेशः

तत्तत्पदोपस्थापितत्वमर्थः शक्यत्वेन वर्त्तमानत्वमर्थः

जन्यत्वम्

अयं कालः पाकजनकवर्त्तमानयत्नवान् पाकजनकवर्त्तमानयत्नविशिष्टैककालिकविशेषणतासम्बन्धेन पाकजनकवर्त्तमानव्यापारवत्त्वात् =

आ॰ वा॰ टी॰

५

सम्बन्धत्वाभ्युपगमात्तद्व्यभिचारावकाश इति तदसत् तस्य सम्बन्धतायां प्रमाणाभावात्मवतीत्यादौ सर्वत्र तत्सम्बन्धस्य … तद्व्याप्तिग्रहस्यैव प्रमाणाभावाच्च तत्राख्यातस्येति य
त्नवतीत्यादावाख्यातस्य जनकयत्ने लक्षणाया अङ्गीकार्यत्वादित्यर्थः लाघवेनेति अनन्यथासिद्धनियतपूर्ववर्त्ति… रूपजन्यत्वात्मकस्य व्यापारत्वस्याख्यातपदशक्यताव
च्छेदककोटिप्रवेशे गौरवात्तदपेक्षया कार्यसामान्यजनकतावच्छेदकत्वेन सिद्धाया यत्नत्वजातेरेव तच्छक्यतावच्छेदककोटिनिवेशनस्योचितत्वमिति भावः ननु सर्वमिदं संभ
वति जन्यत्वस्योक्तरूपत्वे तदेव तु तस्यातिरिक्तत्वाङ्गीकारात् तथा चातिरिक्तजन्यत्वात्मकव्यापारत्वस्याख्यातपद… शक्यतावच्छेदककोटिप्रविष्टत्वेन किञ्चिद्बाधकमस्त्यपाम:
साधकं तु रथो गच्छतीत्यादौ लक्षणाया अकल्पनमिति चेत्सत्यम् व्यापारत्वस्याख्यातपदशक्यतावच्छेदककोटिप्रवि… ष्टत्वेन तु संयोगविभागादिरूपजन्यसामान्ये आख्यातपदशक्ति
त्वकल्पने गौरवात्तदपेक्षया यत्नमात्रे तच्छक्तिकल्पने लाघवस्यातिस्फुटत्वात् यत्नस्यापि व्यापारत्वेन तत्र तच्छक्तिकल्पन… व्यापारसामान्ये शक्तिकल्पनस्यानावश्यकत्वाच्च केचि
त्तु आख्यातस्य समवायमात्रे शक्तिः समवायत्वं शक्यतावच्छेदकं तत्रातिरिक्तं रथो गच्छतीत्यादौ … जनकयत्ने लक्षणामाहुः तदपि न सम्यक् अनन्तसमवाये तच्छ
क्तिकल्पने गौरवात् न च समवायस्यैकतया न गौरवावकाश इति लाघवं च … शक्तिकल्पनापेक्षया स्फुटमेवेति वाच्यम् एकस्मिन्समवाये आख्यातशक्तिकल्पने केवलं चैत्रस
मवेतत्वेन भानं स्यात् चैत्रो हत्वं जानातीति वन्ध्यो चैत्रो हत्वं जानातीति प्रयोगापत्तेः भवन्मते आत्मत्वादिसमवायोपेतया ज्ञानादिसमवायस्यैव लक्षणाभावेनात्मत्वादिसमवायस्य तिमे
दात्मनि ज्ञानाभाववद्दशायामपि ज्ञानसमवायसत्त्वात् यदि चाख्यातपदार्थसमवाये तत्तद्धर्मत्वनिरूपितत्वविशिष्टस्वरूपसम्बन्धत्वमङ्गीकृत्यैवोक्तबाधकोद्धारः सम्भाव्यते त
थापि … व्यतिरिक्तसमवायत्वमाख्यातपदशक्यतावच्छेदकं तत्र विशेषणतासम्बन्धेन ज्ञानविशेषकत्वज्ञानादिकमिष्यते विनिगमनाविरहेण गौरवं दुरुद्धरमेव यत्नशक्तिवादिमते य
त्नत्वस्य जातितया तदितरस्य यत्नसामान्यसाधारणस्य गौरवेण शक्यतावच्छेदकत्वस्यासम्भवादुक्तिर्न याला घवस्य … विशेषणीयमनेवेति स्पष्टीभिरन्यत्वयमन्तर्नीयं शक्ति
ने यत्ने विहायेति लाघवादिति जनकशक्तिवादिनामपि जनकाख्यशक्तिकल्पनस्यावश्यकत्वात् जनकशक्तिवादिमते एतदतिरिक्तशक्त्यकल्पनेन लाघवसम्भवादित्यर्थः
तथा चेति जनकमात्रे शक्तिकल्पने चेत्यर्थः अचेतनेपीत्यादि रथो गच्छतीत्यादौ गमनजनकनोदनाख्यसंयोगादिरूपादौ सम्बन्धेनाख्यातस्य … तथा प्रयोगसम्भवे तत आश्रयत्वादौ
लक्षणाकल्पनाविनाशीति भावः अपचत्यपीति … साधारणजनकशक्तिकरणीया … स्य तु साधारणकारणतया न हति पाकस्य … पचतीति प्रयोगापत्तिरिति वाच्यम् गौर
त्वेन पाकजनकादृष्टजनककृतेरपि पाकजनकतया पाकादिगोचरकृतिकालेपि पचतीति प्रयोगापत्तिरिति … शङ्कां वारयति पाकजनकादृष्टजनक इति मानाभावादिति त
स्याः पाकादिजनकादृष्टजनककृतेः पाकप्रयोजकताया अप्रसिद्धत्वेन … दिना … अनुमानादिप्रमाणस्यानवतारादित्यर्थः अत एवेति तज्जनकादृष्टजनककृतेस्तज्जनकत्वप्रमाणा
भावादेवेत्यर्थः … इत्यादेरित्यादि द्वितिः सकर्तृका कार्यत्वादिनीसधावमादेः तेजनकेति द्वित्यादिजनकेत्यर्थः अर्थान्तरप्रसङ्गापीति … ततः … सकर्तृक … हृदयादिकारक
कृतिजन्यत्वार्थकतया अनुपपत्त्यभावादिति ननु … साधनतायावि … दिसौदनमेतज्जनकादृष्टजनककृतेरपि तज्जनकत्वस्य वेदबोधितत्वेन … कथमति
प्रसङ्गोद्धार इत्यत आह भावेवेति तज्जनकादृष्टजनककृतेस्तज्जनकत्वप्रमाणसद्भावेत्यर्थः तादृशकृतिवारणायेति तादृशकृतिकाले तथाविधप्रयोगवारणायेत्यर्थः तथापीति
जनकभावे शक्तिवादिनापीत्यर्थः ननु जनकयत्ने आख्यातस्य शक्तिकल्पने शक्यतावच्छेदकगौरवात्तदपेक्षया केवलयत्नत्वविशिष्टे शक्तिकल्पनमेवोचितं लाघवादत आह यत्नमात्रमिति
यत्नत्वविशिष्टमात्रमित्यर्थः न चाख्यातस्य यत्नमात्रवाचकत्वे आख्यातपदयत्नपदयोः पर्यायतापत्तिः तच्छक्यतावच्छेदकावच्छिन्नशक्तत्वस्य तात्पर्यार्थतापदार्थत्वादिति वाच्यम् इ
ष्टत्वात् ननु विषयित्वस्य धात्वर्थसंसर्गताभ्युपगमे पाकाद्यनुपधायकगोचरयत्नवति पचतीति प्रयोगापत्तिरित्यत आह जनकत्वेति फलोपधायकत्वेत्यर्थः फलोपधाय

पाके

विशेषणतासम्बन्धेन ज्ञानादेः … समवायविशेषणतात्मक … पारतन्त्र्य=

पाकानुकूला जनक= यत्पाकगोचरकृति…

पचतीत्यादौ

ज्ञानादीनामात्मनि स्वरूपसम्बन्धेन … विशेषणता … लितानन्तर=

साहृदयादिविवेक=

नं

र्थ

कर्तृत्वेत्यर्थः फलोपधायकत्वं च तन्त्रव्युत्पत्तित्वावच्छिन्नजनकत्वमतिरिक्तं वेत्यन्यदेतदिति भावः वैयाकरणमतमाह कर्तृकर्मणीति लकारवाच्यो य आख्यातवाच्ये इतीति इत्येवेत्यर्थः सामानाधिकर
ण्योत्पत्तिरोधादिति नामाख्यातयोरेकधर्मिबोधकत्वरूपसामानाधिकरण्यबोधस्यानुभवसिद्धत्वादित्यर्थः नन्वेतावता चभवेमानाभावइत्यतआह अन्यथेति कर्त्राख्यातकर्माख्यातयोः कर्तृकर्म
णोरनभिधायकत्वेइत्यर्थः तयोरिति तृतीयाद्वितीययोरित्यर्थः अनभिहिताधिकारीयत्वादिति कर्तृकर्मानभिधायकाख्यातसमभिव्याहारे विहितत्वादित्यर्थः यत्राख्यातेन कर्त्राभिधीयते
तत्र तृतीयायत्राख्यातेन कर्माभिधीयते तत्र द्वितीयाभियुक्तसंमतेति भावः नन्वाख्यातस्य कर्त्रभिधायकत्वानभिधायकत्वएव द्वितीयातृतीययोर्विधायकेऽस्तु तत्पाच सर्वमाख्यातस्य कर्त्राद्य
भिधायकत्वमित्यतआह कृत्यभिधानस्येति आविशिष्टत्वादिति कर्माख्यातसाधारणत्वादित्यर्थः तथाचनैयायिकनये कर्माख्यातस्यापि कृतिवाचकतया तत्र तृतीयानस्यादिति भावः ननु नै
नपे. यायिकमतेऽपि कर्माख्यातस्य कर्मत्वार्थकतया कथमेतदिति वाच्यम् प्राचीननैयायिकनयएवेतदभिधानात् स्फुटीभविष्यति चेदमुपरिष्टादिति दिक् केचित्तु कर्तृकर्मण्यादि नियमः द्वितीयातृती
ययोस्तदभावयोस्तु नियम इत्यर्थः यत्रधात्वर्थप्रत्ययेन कर्तृगतसङ्ख्याभिधीयते तत्र कर्तरि न तृतीया यत्र कर्तृगतसङ्ख्यानाभिधीयते तत्र कर्तरि तृतीया एवं यत्र धात्वर्थप्रत्ययेन कर्मगतसङ्ख्या
भिधीयते तत्र कर्मणि द्वितीयाभावः तेन यत्र कर्मगतसङ्ख्यानाभिधीयते तत्र कर्मणि द्वितीयेति भावः चैत्रेण तण्डुलः पच्यतामित्यादाविति नच स्वपः सङ्ख्याभिधायकत्वे चैत्रो रूपवानित्युदाहरणसङ्कोचे
त्यतआह यावदुत्तरमेतावदुत्पत्त्यर्थत्वानुधावनमफलमिति वाच्यम् तदितिक्रियारहितवाक्यमस्तीति न्यायेन चैत्रो रूपवानित्यादौ गच्छतीति क्रियाध्याहारेण सर्वत्र सङ्ख्याबोधसम्भवे लक्षणप्र
सङ्ख्याभिधायकत्वे सति चनणाविधवा कर्मपर्यन्तानुधावनस्यानपेक्षत्वादिति केचित्तु स्त्वपएवेति सुबन्तपदसङ्ख्याप्रकारकः स्वपदादित्यर्थः ननु तदभिधायकत्वमिति न सङ्ख्याभिधायकत्वमि
त्यर्थः तथाच देवदत्तो गच्छतीत्यादावपि तिङः सङ्ख्यानभिधायकत्वेन तृतीयास्यादिति भावः ताहत्वास्तूपमिति हितत्वादिसङ्ख्याबोधकस्य पदस्येत्यर्थः हितत्वादिप्रत्ययादिति तथाच तत्र हि
त्वबोधान्वयानुपपत्तेस्तिङोऽपि सङ्ख्यावाचकत्वमिति भावः यत्र चैत्रो मैत्रश्च गच्छत इत्यादौ भेदपदोत्तरत्वविभक्तिहितत्वादिलाक्षणिकतया हितत्वादिबोधसम्भवे तिङः सङ्ख्याभिधायकत्वं निर्युक्ति
कमित्यतआह एवम् विनिगमनाविरहेण चैत्रपदोत्तरत्वविभक्तेर्हितत्वादि [illegible] पाहित्व [illegible] बोध [illegible] कत्वस्यावश्यकत्वे चैत्रश्च मैत्रश्च प्रतीयते त्यापत्तेर्द्वी
त्वात् तत्रैकवचनोपस्थितैकत्वान्वितचैत्रादेः कथमपि द्वित्वस्याप्यद्वित्वादेरन्वयः तिलनापाद्धनीय [illegible] तत्रैकत्वस्याविवक्षितत्वादिति नन्वतथापि पदपश्चितयुक्तमातिङो द्वित्वाभिधायकत्वमस्तु
एकत्वाभिधायकत्वं तत्र नियुक्तिकमित्याशङ्कामपाकर्तुमाह लाघवादेकवचनत्वादिनैवेति तथाचैकवचनत्वविशिष्टस्य स्वप्रकृत्येकत्वशक्ततावच्छेदकत्वेनैव गौरवात्तदपहायेकव
चनत्वस्यैकत्वशक्ततावच्छेदकत्वकल्पनमुचितम् एकवचनत्वेनाभियुक्तैरेकवचनत्वेन परिभाषितत्वं तच्चतिवादिसाधारणमितिति वादेरण्येकत्वबोधकत्वमवश्यमिति भावः केचित्तु प
चतीत्यादावाख्यातपदात्तत्तणयाघाग्नानाकर्तृत्वोर्थोपितत्रनियमनपकत्वबोधस्यानुभवसिद्धत्वात्तिण्यपकत्वबोधकत्वमावश्यकम् तत्रचाख्यातस्यैवैकत्वविशिष्टकर्तरि लक्षणेति वा
च्यम् नियमनः पृतीयमानेष्वर्थे लक्षणाकल्पनेयत्नोपाख्यातशक्तिकल्पनस्य निर्युक्तिकत्वलक्षणायेवनत्रयत्नबोधसम्भवादित्याहुः कर्तृकर्मसङ्ख्याभिधानानभिधानाभ्यामित्यारभ्य तन्मात्रे
णाशङ्कायस्योपरिवैयाकरणैः समाधेयं कृतेत्याह तथाचसुविभक्तिं विना कत्वस्य स्थानास्मातृत्वे नतयोपरस्तु पदवसङ्ख्याबोधसम्भवेकृतः सङ्ख्याबोधकत्वं निर्युक्तिकम् नच वि
निगमनाविरह इति वाच्यम् एकवचनत्वेन स्वपत्त्वप्रकारकस्य बहुत्वात् एवंवचैत्रो ग्रामं गतवानित्यादौ गमिधातूत्तरकृत्प्रत्ययस्य सङ्ख्यानभिधायकत्वे तत्र तृतीयापत्तेर्द्वितीयाविशक्तिवारणन्नादि
ति भावः ननु यत्राख्यातेन कर्तृगतसङ्ख्याभिधीयते तत्र प्रथमा यत्र चत्रेन कर्तृगतसङ्ख्यानाभिधीयते तत्र तृतीयेत्यादिनियमो वाच्यः कृतमायस्थलेचकर्त्रादेरभिधानानभिधानाभ्यां तथा तत्र चनकोपि नियमोवाच्यः =
दोषइत्यतआह किञ्चेति नियमइति कर्त्राख्यातेन कर्तृगतसङ्ख्याभिधीयते तत्र कर्मगतसङ्ख्या एवं कर्माख्यातेन कर्मगतसङ्ख्याभिधीयते तत्र कर्तृगतसङ्ख्येति नियमालाभइत्यर्थः नन्वत्राहयाति
यमालाभेतातिरित्यतआह पदार्थतावच्छेदकावच्छिन्नस्येति एकत्वतावच्छिन्नस्येत्यर्थः आकाङ्क्षादिवशाद्देकत्वतावच्छिन्नविषयिताशक्तिवशादित्यर्थः तथाच चैत्रो ग्रामं गच्छतीत्यत्राख्यातेन कर्मात

आ॰ वा॰ टी॰ ५

सङ्ख्याबोधेनान्वयबोधकाभावेन तत्रापि कर्मत्वप्रत्ययमापद्यत एवं च चैत्रेणौदनः पच्यते इत्यत्राख्याते नकर्मगतसङ्ख्याबोधे बाधकाभावेन तत्रापि कर्तृत्वप्रत्ययमापन्नेति भावः ननु कर्मैकवचनत्वा
वच्छिन्नस्य कर्मैकत्वत्वेन शक्यतावच्छेदकं एवं कर्मैकवचनत्वावच्छिन्नस्य कर्मैकत्वत्वेन शक्यतावच्छेदकत्वात् तथा च शक्यतावच्छेदकस्य शक्यतावच्छेदके दाक्षसर्वत्र कर्तृकर्मसाधारणैकत्वत्वं प्रत्यय
मात्रे कर्त्रैकत्वत्वादिनाभिधानेत्विति कर्त्रैकत्वत्वादिना कर्त्रैकत्वादेः कर्त्रैकवचनत्वावच्छिन्नादेः शक्तिकल्पनेत्यर्थः आदिना कर्मैकत्वत्वादिपरिग्रहः अभिधेयत्वं शक्यतावच्छेदककोटिप्रविष्ट
त्वम् इदमुपलक्षणम् कर्त्रादिपदस्यापि शक्यतावच्छेदककोटिप्रविष्टत्वमित्यपि बोध्यम् ननु तेनैव किमायातमित्यत आह शक्याविति शक्याविष्यस्य … वमित्यर्थे नत्वेनान्वयः तथा च कर्त्रादि
घटितधर्मविशिष्टशक्तिकल्पनेन नहि तद्धर्मस्य शक्यतावच्छेदकत्वकल्पनेन च महद्गौरवं तेन न्यायिकमते वैयाकरणमते एकत्व
त्वादिना शक्यतापकैकवचनत्वादिना च शक्तत्वेऽतिलाघवमस्ति स्फुटमेवेति भावः वैयाकरणमतमुपसंहरति तस्मादिति … निरस्तादिन्नेवमर्थः नन्वेवमपि वैयाकरणमते कथ
नु कर्त्राख्यातस्थले कर्मादेः सङ्ख्यान्वय इत्यत आह एकपदेति कर्त्रादिसङ्ख्याया अपि एकाख्यातपदोपस्थाप्यत्वादित्यर्थः वाचाशक्तिमिति कर्माख्यातादिस्थले सङ्ख्यायाः कर्त्रादिसम्बन्धेऽपि नमिल
सः तथा चैकपदोपस्थाप्यानामर्थानामसति बाधके परस्परान्वय इति नियमेन एकत्वादिनिष्ठप्रकारतानिरूपितकर्तृनिष्ठविशेष्यतासम्बन्धेन कर्त्राख्यातपदज्ञानजन्यशाब्दबुद्धित्वाव
च्छिन्नं प्रति कर्त्राख्यातपदजन्यकर्तृपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वस्य एवमेकत्वादिनिष्ठप्रकारतानिरूपितकर्मनिष्ठविशेष्यतासम्बन्धेन कर्माख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्र
ति कर्माख्यातपदज्ञानजन्यकर्मोपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वस्य च कल्पनीयतया न कर्त्राख्यातस्थले कर्मादेः सङ्ख्यान्वय इति भावः ननु कर्त्राख्यातत्वेन कर्माख्यातत्वेन पदत्वेन
शक्तिकल्पने चैत्रः पच्यते तण्डुल इत्यादिप्रयोगापत्तिः तथाख्यातस्याख्यातत्वेन कर्मविशेष्यकत्वेन कर्तृरूपस्थितिसम्भवे तात्पर्येण पदत्वेन च तस्य कर्मशक्त्या तथा कर्मणोपस्थितिसम्भवे न
तयोस्तत्त्वे चैत्रतण्डुलादावपि सम्बन्धेनान्वयबोधे बाधकाभावादित्यत आह कर्मेति कर्मेत्यादि एकदाद्यन्यमिति एकस्मिन्काले एकस्यार्थस्य … इत्यर्थः तथा च तदाख्यातपद
ज्ञानकर्तृत्वप्रकारककर्तृविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्मबोधगृहीततात्पर्यकतदाख्यातपदज्ञानत्वादिना एवं तदाख्यातपदजन्यकर्मत्वप्रकारककर्मविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृबो
धगृहीततात्पर्यकतदाख्यातपदज्ञानत्वादिना च प्रतिबन्धकत्वस्य कल्पनीयतया न तदेकदा एकाख्यातपदात्कर्तृकर्मणोर्बोधापत्तिरिति भावः केचित्तु तदाख्यातजन्यकर्तृत्वप्रकारककर्तृविषयकशा
ब्दबुद्धित्वावच्छिन्नं प्रति कर्मत्वबोधकत्रिभक्तिसमभिव्याहृतधातुसमभिव्याहृततदाख्यातपदजन्यकर्तृपस्थितेरेव तदाख्यातपदजन्यकर्मत्वप्रकारककर्मशाब्दबुद्धित्वावच्छिन्नं प्रति च त त्वात्
श्रीयात्तृपदसमभिव्याहृतधातुपरसमभिव्याहृततदाख्यातपदज्ञानजन्यकर्मोपस्थितेश्च हेतुत्वस्य कल्पनीयतया न तदेकाख्यातपदात्कर्तृकर्मणोरन्वयबोधः चैत्रेण तण्डुलः पच्यते
पच्यते तण्डुल इत्यादिप्रयोगे चैत्रः पच्यते तण्डुल इत्यादिप्रयोगावारणेऽपि चैत्रः पच्यते तण्डुलमित्यादिप्रयोगापत्तिर्दुर्वारैव
ततः कर्मत्वबोधगृहीततात्पर्यकाख्यातपदज्ञानाभावात् कर्मत्वबोधकत्रिभक्तिसमभिव्याहृतधातुसमभिव्याहृततदाख्यातपदजन्यकर्तृपस्थितिसत्त्वाच्च कर्तृबोधकाभावादित्यत आह कर्मेति त त्वाख्यात
थाच कर्तृत्वप्रकारककर्तृशाब्दबुद्धिजनकतावच्छेदककोटौ आख्यातपदांशे द्वितीयासमभिव्याहृततन्मपि निवेशनीयमिति नोपदर्शितप्रयोगापत्तिरिति भावः नैयायिकः प्रत्यवतिष्ठते आख्या
तदमीति नैयायिकनये ताणुवत्सिद्धकृत्यादिशक्यतावच्छेदकाख्यातपदसमभिव्याहृतक्रियानुकूलीभूतकर्तृकर्मगतसङ्ख्याभिधानानभिधानविधायककर्तृकर्मसाधारणैकत्वेन सङ्ख्याबोधा
पादनेन निराकरोति माह भावनाविशेषणमिति समानपदोपात्तत्वेनेति एकपदोपस्थाप्यत्वेनेत्यर्थः एकान्वयित्वसौचित्यतादिति एकान्वयित्वस्य बाधकं विना नियमसिद्धत्वादित्यर्थः ननु
कपदोपस्थाप्यानामेकान्वयित्वनियमे प्रयोजनकत्वाद्ये … तथाविधनियमस्वीकारे लाघवमेव प्रयोजकत्वसम्भवात् तथाहि आख्यातपदोपस्थाप्यभावनायाः
कार्यस्यान्वयबोधार्थमव्ययपदार्थीभवेच्चेत्तत्पुष्पस्थितिकल्पने मा … पदजन्योपस्थिति … नामन्वयभावनान्वयस्याद्यपत्तेः ता

कर्मत्वबोधकद्वितीयाविभक्तिसमभिव्याहृतधातुसमभिव्याहृतयाच्छमभिव्याहृताख्यातपदज्ञानजन्यकर्तृपस्थितिः कारणं

विशेष्यतासम्बन्धेनाख्यातपदजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति ६

प्रकारोपस्थापनाम्ये कार्यान्वयित्वनियमः = २ — भावनाविशेष्ये सङ्ख्यान्वयः = १

याच सङ्ख्यायामपि चैत्रमात्रान्वयस्वीकारे पदार्थान्तरोपस्थित्यन्तराकल्पनप्रयुक्तलाघवमनिस्कृ द एवेत्युक्तनियमाभ्युपगमः न चोक्तनियमाभ्युपगमेपि चैत्रेनाप्तोक्ति साध्यत्वावित
पाके सङ्ख्यान्वयापत्तिरिति वाच्यम् आख्यातपदत्वावच्छिन्नसङ्ख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदजन्याख्यातपदार्थाख्यातपदार्थभावनाविशेष्योपस्थितेर्विशेष्यतास
म्बन्धेन हेतुत्वस्य कल्पनीयतया उपदर्शितापत्तेरभावात् न च तथाप्युपदर्शितनियमभङ्गप्रसङ्ग इति वाच्यम् अन्यथानुपपत्त्या तादृशनियमे क्लृप्तिसाध्यत्वेपि सामान्यनायातिरिक्तत्वेनैकप
दोपस्थाप्यस्यापि विशेषणीयत्वादिति सारम् ननु भावनैव कर्त्रा नेति कर्त्रन्वयाकिं नियामकमित्यत्राह भावनाया एवादि अन्वययोग्यत्वमिति तथाविधान्वयः कार्यकारणभावसिद्ध इत्यर्थः तथा
च कर्मत्वाद्यनवरुद्धप्रथमान्तपदोपस्थाप्यस्यैवाख्यातार्थभावनायां विशेष्यत्वेनान्वययोग्यत्वस्य कार्यकारणभावसिद्धतया तत्र भावनान्वयाविरोध इति भावः ननु उक्तरीत्या कार्यकारणभा
वसिद्धस्यान्वयस्यात्राह तथैवेति भावनानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन प्रथमान्तनामपदजन्यकर्मत्वाद्यनवरुद्धार्थविशेष्यकोपस्थितित्वेनैवेत्यर्थः साकाङ्क्षत्वादि
तिशाब्दबोधपदजन्योपस्थितेः कार्यकारणभावकल्पनादित्यर्थः तथा च तादृशकार्यकारणभावबलात् प्रथमान्तपदोपस्थाप्ये भावनायां विशेष्यत्वेनान्वयनियम इति भावः
ननूपदर्शितकार्यकारणभावे कारणतावच्छेदककोटौ कर्मत्वाद्यनवरुद्धत्वविशेषणं व्यर्थं प्रदिच कर्मत्वाद्यनवरुद्धत्वविशेषणस्य निवेशे तथाविधान्वयबुद्धिं प्रति प्रथमान्तपदजन्यो
पस्थितेर्हेतुत्वे चैत्रस्तण्डुलं पचतीत्यत्र अनवरुद्धत्वकारणतावच्छेदककोटौ निवेशितमिति विभाव्यते तथापि चैत्रपदे प्रथमान्तत्वविशेषणत्वं व्यर्थमेव द्वितीयान्तपदजन्योपस्थितिविषयीभूत
र्थस्यापि शाब्दबोधे कर्मत्वविशेषणतया तण्डुलविशेषणत्वाविरहाद्देवदत्तभावनायामन्वयबोधापत्तिवारणसम्भवात् एतेन भावनानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेनाख्यातपदजन्यशा
ब्दबुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वे कल्पिते तत्र च कर्मत्वाद्यनवरुद्धत्वमपि निवेश्य फलं न स्यादित्यनाशङ्क्यत्वात् न च प्रकृते शाब्दबोधे तत्र विशेष
णत्वमवतल्मके नेत्र प्रथमान्तत्वं तत्पदजन्यत्वमिति वाच्यम् चन्द्र इव मुखं राजते इत्यादिवाक्यजन्यसमूहालम्बनबोधे चन्द्रे भावनान्वयानुपपत्तेः न च प्रथमान्तपदजन्योपस्थाप्य शाब्द
बोधविशेष्यताभावे सति तथाविधशाब्दबोधे तत्तद्विशेषणत्वमेव तद्विवक्षितमिति वाच्यम् तथा सति तादृशबोधे सोपदर्शितकारणतावच्छेदककोटौ निवेशापरस्परविशेषणविशेष्यभावे वि
निगमनाविरहेण कार्यकारणभावानन्त्यप्रसङ्गात् तथाविधान्वयबुद्धिं प्रति स्वीयविशेष्यताभावविशिष्टप्रकारतासम्बन्धेन शाब्दबोधस्यैव कार्यकालत्वे तत्र तथा प्रतिबन्धकत्व
कल्पनमपि चित्रम् तादृशप्रतिबन्धकाभावादिकारणत्वकल्पिकापत्तिः कर्मत्वाद्यनवरुद्धत्वादिप्रत्ययदर्शिता तादृशानुपपत्तेर्विशेषणोपादाने तादृशप्रतिबन्धकाभावस्य हे
तुत्वात्मा च चन्द्र इव मुखं मस्ती त्यादौ चन्द्रादिपदार्थे भावनायामन्वयप्रसङ्ग इति तदुपादानमिति पदतात्पर्यम् उपदर्शितप्रतिबन्धकाभावस्य हेतुत्वे प्रथमान्तपदजन्योपस्थितिकारणतावच्छेदक
कोटौ पदार्थोपस्थित्यमानत्वविशेषणोपादानस्य व्यर्थत्वं तत्रैव तदुपादानसम्पादकत्वात् तथाविधविशेषणस्य प्रयुक्तत्वेनोपस्थेयेन नाभावादिति नैवम् तत्र तदिदं द्वितीयाविभक्त्यन्ताद्येनेक
पदेषु तथाविधोपस्थितिनिष्ठकारणतावच्छेदकत्वकल्पनेऽगौरवात् मम्र तेप्रथमान्तपदत्वं तत्कल्पनमिति लाघवस्येवोपदर्शितकारणतावच्छेदककोटौ प्रथमान्तत्वविशिष्टसमानाद
केन यो पदर्शितस्य प्रमाणाभावपि तादृशविशेषणनिवेशस्यावश्यकत्वात् अन्यथा तदनुसारेणोपदर्शितविशेषणे चेदितरकार्यकारणभावकल्पनायामप्रामाण्यादिति ननु भावनायां समानादिपदार्थस्य
पदर्शितरीत्या तस्य निपरत्वेन चैत्रादिपदस्य स्वकार्थ इति चेत् गच्छ तथैवेति तादृशपदजन्यस्य तदनुसारेणोपदर्शितरूपेणैवेत्यर्थः तथा च प्रतिबन्धकाभावतत्तादृशपदजन्योपस्थितित्वादिनैवेति
तत्तिगलितार्थः साकाङ्क्षत्वात् कार्यकारणभावस्याकाङ्क्षादिरूपत्वात् कल्पनीयत्वादिति यावत् तथा चोक्तं मत्र तदनुसारेणोपदर्शितकार्यकारणभावकल्पने समानाभावनायाम
न्वयनियमस्योपपादनीयत्वमिति भावः उपदर्शितस्य त्यागे किमानमिति नन्वाकृ दीयं तत्र भवस्यैव धारणीकरणे यत्नात्मन्यायानुमान स्यावच्छेदापत्तिरिति तदनयत्वविनेन तत्रे

स्त्री त्यादौ प्रथमान्तप दोपस्थितिविषये च त्रे सत्यपि च भावनायां अन्वयप्रसङ्गः स्यात् तदभावा दुपपाद्यबोधे तत्राविशेषणताया अर्थकं कर्मत्वा ११

च चन्द्र इव मुखं मस्तीत्यत्र विशेष्यतासम्बन्धेन तत्र विशेषणे त्वे च च स्त्री तत्र भा वनान्वयः चन्द्र इव मुखं च कारजाते चन्द्र इव मुखं स्त्र विशे ष्ये भावितान्वये मुखपदे विशेष्यताभावविशिष्टेन विशेषण कत्वस्याभावः =

न चेति

इतरा विशेषणत्वम् =

मुखत्वे = प्रथमान्ततत्
निवेश

न्या॰ वी॰ टी॰ ६

6

कुमतिवलसिद्ध सहेतत्वस्य:

चैत्र हत्या श्रयत्व निरूपकः स्वापः =

नत्वर्थान्वयापत्तेः =

धात्वर्थस्य भावनायाविशेष्यत्वमतु:

स्वापनिरूपिताश्रयत्वं मैत्रे ः =

चैत्रवृत्त्याश्रयत्ववान् स्वापः तथा सम्भवात्

वेति भावनाविशेष्यकत्वे विकर्मणीत्येवमर्थः। न च भावनाविशेष्ये सङ्ख्यान्वयस्वीकारे चैत्रेण स्वप्यते इत्यादौ सङ्ख्यान्वयापत्तिः स्वप्नभावनाविशेष्यविरहादतस्तत्रेष्टापत्तिमाह चैत्रेण स्वप्य-
त इत्यादिना प्रथमान्तपदाभावादित्यस्य भावनाविशेष्यविरहादित्यादिर्मतत्रेतेत्यन्वयः। नन्वेवं चैत्रेण स्वप्यते इत्यादौ धात्वर्थस्य भावनाविशेष्यत्वेनाभावे तथा च तत्रैव सङ्ख्यान्वयः सम्भ-
वेत्किमर्थं प्रदर्शितं तत्स्थले सङ्ख्याद्यनन्वये इष्टापत्तिरित्यत आह धात्वर्थस्येति। प्रत्ययार्थत्वादिति। तथा च भावनाविशेषणतेनैव धात्वर्थान्वय इति प्रसक्तिर्बलसिद्धस्य चैत्रः स्वपितीत्यादौ
स्वापादि इति ह प्रकारतानिरूपितविशेष्यतासम्बन्धेन तथाविधबोधकजनकत्वाभावे तु हित्वावच्छिन्नप्रत्ययार्थत्वात्पदज्ञानजन्यभावनोपस्थिते विशेष्यतासम्बन्धेन देवदत्तस्य कल्पना चैत्रेण स्व-
प्यते इत्यादौ स्वापादेर्भावनायाविशेष्यत्वेनान्वये बाधकत्वमिति भावः। ननु भावनाविशेषणत्वेनैव धात्वर्थान्वय इति प्रत्ययेनाभावाख्यातस्थले सङ्कोचः कल्पनीयः भावाख्यातस्थले चधात्वर्थ-
स्यैव भावनाप्रकारकबोधाङ्गीकारे त्वेतद्विरहं स्यात् अत आह भावनायाबाधितत्वाच्चेति। चैत्रेण सुप्यत इत्यादौ आख्यातार्थायाः प्रत्ययरूपाया भावनायाः स्वापे बाधेन तत्र तदन्वयासम्भवादित्यर्थः। न-
नु निरूपकत्वसम्बन्धेनैव तत्र तदन्वयः सम्भवतीति चेन्न तथा सति चैत्रेण सुप्यते मैत्रेणेत्यादौ तान्वयानन्वयापत्तेः। न च तत्र निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाश्रयत्वाभावसं-
स्वापेऽन्वयसम्भवात् ननु तत्र तथान्वयोपपत्तिरिति वाच्यम्। इयं नियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकतया निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताकाश्रयत्वाभावस्यालीकतया सम्-
वेनोपदर्शितानुपपत्तेर्दुर्वारत्वात्। चैत्रेण सुप्यते इत्यादावेककालीनत्वादिसम्बन्धेन स्वापेऽन्वयः तस्यान्वयः इति तन्नाकाङ्क्षास्यादपि तत्रैतेन सम्बन्धेनाश्रयत्वस्यान्वये निराकाङ्क्षत्वात्। मैत्रस्य
जागरणादशायां चैत्राश्रयत्वमादायापि मैत्रेण सुप्यत इति प्रयोगापत्तेश्चेति स्थलम्। ननु तत्रैकवचनं साङ्ख्यापाक्षान्वये एकवचनं व्यर्थमत आह एकवचनमित्यादि। अतएव भावाख्यातस्थले एक-
वचनस्य साधुत्वादेवमर्थः औत्सर्गिकमिति प्रथमोपस्थितमित्यर्थः। न च यथा तत्र स्वापादौ सङ्ख्यायाम् अन्वयस्वीकारे स्वापद्वित्वबहुत्वे विभावाख्यातस्थले द्विवचनबहुवचनापत्तेः तत्रेष्टापत्तिर्न सं-
भवति अभिप्रेतविरुद्धत्वादिति भावः। न च भावाख्यातस्थले सङ्ख्याभावनयोरन्वयो भवति तेनैवैतत्सिद्ध्यत आह एवं चेति। भावाख्यातस्थले सङ्ख्याभावनयोरनन्वये चेत्यर्थः। यथायथमित्यादि वर्त-
मानत्वं लडर्थः इष्टसाधनत्वं लिङर्थ इत्यर्थः। इष्टसाधनत्वादिकमित्यत्रादिपदं मतीतत्वकृतिसाध्यत्वबाधपुरर्थकम्। ननु लिङर्थे इष्टसाधनत्वादेः लङ्यातीतत्वादेः अन्वयस्तत्राह तत्रेत्यादि लिङर्थेष्टसाध-
नत्वे लङर्थातीतत्वादिकं चेत्यर्थः। ननु तथान्वये मानाभाव इत्यत आह तथेति। लिङादिसमभिव्याहारस्थले धात्वर्थविशेष्यके इष्टसाधनत्वप्रकारकबोधस्यैवानुभवसिद्धत्वादित्यर्थः। इदमुपलक्षणम्।
चैत्रेण सुप्यत इत्यादौ हन्तित्वन्तरीयार्थः वर्तमानत्वं भावविलिङर्थः धात्वर्थः स्वापः तथा च चैत्रेण त्वनिर्वर्तमानस्वापरत्वेनान्वयबोधः एवं चैत्रेण सुप्यतामित्यादौ भावलिङर्थे इष्टसाधनत्वादिकमर्थः। तथा च चैत्र-
वृत्तिस्वापरइष्टसाधनं कृतिसाध्यत्वेनाकारकान्वयबोधः एवमन्येष्वपि स्वसमभिव्याहृतमिति। तद्बोधकानामिति वर्तमानत्वाद्यबोधकानामित्यर्थः। ननु भावनायाः प्रथमान्तपदोपस्थाप्ये-
के न सम्बन्धेनान्वयः न तावदाश्रयतासम्बन्धेन चैत्रेण पच्यते तण्डुल इत्यत्र तण्डुले आख्यातार्थकृतिरूपाया भावनाया बाधितत्वादित्यत आह भावनायाश्चेति। आश्रयत्वेनाश्रयतासम्बन्धेनेत्य-
र्थः। अन्वयेति तत्समानपरमरपर्यर्थः। तथा च सामान्यतरमरयाभावनाविशेष्यत्वे सङ्ख्यायामन्वयनियम इति भावः। न च सङ्ख्यातिरिक्ताख्यातार्थमात्रस्य भावनाप्रदर्शकत्वनयाकर्माख्यातस्थ-
ले कर्मत्वस्याख्यातार्थतया साक्षाद्भावनाविशेष्यत्वेन सङ्ख्यान्वयनियमोऽस्तु अन्यत्र परम्परयावेतस्यापि विशेषणत्वेऽनि वाच्यम्। प्राचीनमतेकर्माख्यातस्थापि कृत्यर्थकतया कर्मत्वार्थकत्वाभावे तु कर्मत्वस्य भावनान्वयवि-
रहाद्दुपदर्शितानुपपत्तेरभावादिति। ननु यथा चैत्रेण पच्यते तण्डुल इत्यत्र नैयायिकमतेपरम्परयाकर्मणि हेतोरन्वयस्तथा चैत्रेण पचति तण्डुल इत्यत्रापि कथं नान्वयः एवं नैयायिकमते चैत्रः पचति तण्डु- ६
लमित्यत्रैव चैत्रः पच्यते तण्डुलमित्यत्राप्याश्रयतासम्बन्धेन कर्तरि अन्वयबोधापत्तिः एवं मैत्रः पच्यते तण्डुल इत्यत्र कथं वा न मते यथोक्तरीत्या कर्तरि नान्वयः दर्शितस्थलेषु सर्वत्राख्यातपदात्के क-
पस्थितिसत्त्वादित्याशङ्कामपाकर्तुमाह तत्वेति वैयाकरणस्येत्यर्थः। तथान्वयबोधकत्वमिति कर्तृकर्मणोः कर्तृबोधकत्वमित्यर्थः। तथा च वैयाकरणमते याहशाया हशाबुद्धित्वावच्छि-

मात्र २ दि ५

ष्प्रति याहशा याहशानुपूर्वीज्ञानत्वेन कारणता नैयायिकमतेपि ताहशताहशशाब्दबुद्धित्वावच्छिन्नं प्रति ताहशानुपूर्वीज्ञानत्वेनैव हेतुत्वकल्पनावश्यकत्वान्नानुपपत्तिरिति भावः तथाविधकार्यकारणभावकल्पनाबी
जस्य पूर्वमेवासूचयति अत एवेति तथाविधकार्यकारणभावकल्पनादित्यर्थः तत्प्रयोगा इति तत्ताहशताहशशाब्दबोधजनका इत्यर्थः ननु भावनायाः कृतिरूपत्वेन तद्विशेष्यकसङ्ख्यान्वयनियमात् कीकारे
रथो गच्छतीत्यादौ कथं रथे सङ्ख्यान्वयः भावनाविशेष्यत्वाभावादित्यत आह भावना चेति सङ्ख्येतिरिक्ताख्यातार्थमित्युक्तनियमघटकीभूतभावनापदार्थ इत्यर्थः अचेतनानुरोधादिति रथो ग
च्छतीत्यादौ रथादौ सङ्ख्यान्वयानुरोधादित्यर्थः तथा चाख्यातस्य कर्त्रादिगतसङ्ख्याभिधानानुरोधात् भावस्थमात्रस्य ... यत्र नियमोपपत्तावाख्यातस्य कर्त्रादिशक्तिमभ्युपगच्छतां वैयाकरणानां
मतमनादरणीयमेवेत्युक्तनिशक्तिवादि नैयायिकमते ... स्वधी... सिद्धमिति भावः ननु नैयायिकमते आख्यातपदं चैत्रपदयोर्विशिष्टरूपेणैकधर्मिबोधकत्वस्य समानाधिकरण्यस्यानुभो
पपन्नः तथा चानुभवकृतं सामानाधिकरण्यं कथं तन्मते सङ्गमयितव्यमित्यत आह विशिष्टायामिति तथा च ताहशानुभवपर्यवसितं इति भावः अन्याहृष्टान्तिति एकधर्मिणि विभिन्नधर्मबोधकत्वरूपं सामानाधिक
रण्यमित्यर्थः अत्र वैयाकरणमतानुयायिनः आख्यातस्य कर्त्रादिशक्तिकल्पने नैयायिकमतमपेक्ष्य लाघवसम्भवात् तदेवोचितं तथाहि नन्वनेकर्तृत्वादिप्रकारकज्ञानाभावे लौकिकप्रत्यक्षाद्यवच्छि
न्नप्रत्याख्यातपदनिरूपितशक्तिज्ञानादिघटित शाब्दबोधसामग्र्याः प्रतिबन्धकताकल्पने पितथाविधशाब्दबोधसामग्रीकाले कर्तृत्वप्रकारकज्ञानाभावासत्त्वेन विषयासत्त्वेव तथाविधलौकिकप्र
त्यक्षानुत्पादसम्भवेन तथाविधशाब्दबोधप्रतिबध्यप्रतिबन्धकभावकल्पनाभावप्रयुक्तलाघवमतिस्फुटमेव नैयायिकमते तु तथाविधशाब्दबोधसामग्रीकाले ताहशज्ञानाभावरूपविषयसत्त्वेन
विना तथाविधप्रतिबध्यप्रतिबन्धकभावकल्पनं तथाविधप्रत्यक्षवारणमशक्यमिति तत्कल्पने महद्गौरवम् तत्र वैयाकरणमते कर्तृत्वप्रकारकज्ञानाभावप्रत्यक्षप्रति तथाविधशाब्दबोधसामग्र्याः प्र
तिबन्धकत्वकल्पनावश्यकत्वे तु नैयायिकमतमपेक्ष्य लाघवं कथं ... नैयायिकमते तथाकल्पनायामभावादिति वाच्यम् वैयाकरणमते कर्तृरूपस्थितिकाले कर्तृत्वप्रकारकज्ञानस्य सम्भावत्वप
कत्वेन तथाविधशाब्दबोधसामग्रीकाले विषयासत्त्वेव कर्तृत्वप्रकारकज्ञानाभावप्रत्यक्षवारणसम्भवेन तथाविधप्रतिबध्यप्रतिबन्धकभावकल्पनेयोपदर्शितलाघवस्यानपलपनीयत्वात् यदि च नवीना
स्तु ... तथाविधप्रतिबन्धकाभावहेतुत्वं नायिकमिति मन्यते तथापि ताहशप्रतिबन्धकाभावतथाविधप्रत्यक्षहेतुत्वसम्बन्धकल्पनं गौरवाय नैयायिकानामित्याहुः तदपि न वि
चारसहम् ... प्रकारकयोग्यताज्ञानतथाविधकर्तृत्वप्रकारकबोधाभावव्याप्य ... शाब्दबोधसामग्र्या भावे ... कारणत्वसम्बन्धक
ल्पनेन वैयाकरणमतेव गौरवसम्भवादित्यलं विस्तरः कथमिति केन सम्बन्धेन भावनायां विशेषणम् इत्यर्थः ... विषय इत्यत आह ... तथा च चैत्रेण
पच्यते तण्डुलः इत्यादौ तण्डुलादिविषयतासम्बन्धेन भावनायां विशेषणमित्यर्थः सविषयव्यापार इति सविषयव्यापारानिमित्तस्य ... इत्यर्थः रथेन गम्यते ग्रामः इत्यादौ नोदनाख्यसंयोगरूपव्यापार
स्याख्यातार्थत्वे तथा तस्य च निर्विषयतया विषयतासम्बन्धेन ग्रामादावन्वयासम्भवे नोपदर्शितरीत्या सम्बन्धाभाव इति भावः मैत्रेणेति पाकभावनेति मैत्रनिष्ठा या पाकानुकूला भावना त
द्विषयत्वं तण्डुलस्येत्यर्थः तण्डुलस्य तथाविधभावनाया विषयत्वं तु पादानत्वाख्यं ग्रामस्य ... कर्माख्यातस्थले कर्मत्वप्रकारककर्मविशेष्यकबोधस्यानुभवसिद्धत्वेन ताहशमैत्रनिष्ठेति प्रतीयत इ
ति ताहशवाक्यजन्यबोधेतिशेषः सामानाधिकरण्येति अत्र चोपदर्शितबोधद्वयोर्विकल्पानुरोधेन तथैव कल्पितोपादानमिति ... रथेन गम्यते ग्रामः इत्यादौ ग्रामे भावनायामन्वयप्रकारमाह रथे
न गम्यते ग्राम इत्यादिना तथा च कर्माख्यातस्थले भावनायामन्वयः कुत्र चित्त्विति तथा कर्मणि तु परस्मैपदादिति भावः प्राचीनमतं दूषयन् नवीनमतं दर्शयति तथापीति नतु कर्मा
ख्यातस्य तु आधेयत्वस्य ... कर्त्राख्यातस्थले ... भावनाविशेष्यत्वेनेति कर्माख्यातस्थले ... भावनायां विशेष्यत्वेनान्वये ... वलोपापत्तिः एवं ताहशवाक्येन तथाविधबोधजनने आ
धेयत्वे तृतीयापदनिरूपितशक्तिज्ञानस्य सहकारित्वकल्पने गौरवं चेत्यत आह मात्रपदेनाधेयत्वव्यवच्छेदः सम्बन्धश्च भावनयोः ... इत्यर्थः वाक्यार्थ इति तथाविधवाक्यानुपूर्वीज्ञानबलाद् उ
बोधे भासत इत्यर्थः तथा च तथाविधस्थले तदनुभवस्तदा सङ्ख्यामात्रं तृतीयार्थः आधेयत्वं तु सम्बन्धमर्यादया भासत इति भावः ... इत्यर्थः तद्रूपीति फलमपीत्यर्थः नयेति वाक्यार्थसम्बन्ध

सङ्ख्यामात्रं वेति

यत्र चैत्रादौ भावनाख्यनिरूपितविशेष्यत्वेन
चेति पचति पाकानुकूल भावनाशालीत्यर्थः

चैत्रादिः स्वनिरूपितविशेष्यतया
भावनायामन्वेति चैत्रेणपच्यते चैत्र
वृत्ति भावनाजन्यपाकजन्यफलशाली

... पाकः सिद्ध

व्यु॰ क॰ टी॰ ७ त्यर्थः भासमानत्वादिति तथा च नामार्थधात्वर्थयोर्भेदान्वयबोधानभ्युपगमेन कर्माख्यातस्थले फलप्रकारकबोधानुभवापलापे व तत्र फलस्य समन्वयविषयाभानासम्भवादिति भावः क्रियाजन्य
फलालाभादिति जन्यतासम्बन्धेन क्रियाविशिष्टं यत्फलं तस्य धात्वर्थतोऽलाभादित्यर्थः विशेषणविशेष्यभावे मानाहि फलविशेष्यकक्रियाविशेषणकबोधस्य धातुतोऽप्राप्तत्वादित्यर्थः एतावता
प्राचीनमतं दूषयित्वा नवीनः स्वमतमुपसंहरति तस्मादिति इत्थं चेति फलस्यात्मनेपदार्थत्वे चेत्यर्थः नलभ्येतेति तथा च कर्माख्यातस्थले फलविशेष्यकजन्यतासंसर्गकक्रियाविशेषणकबोधानुभव
सिद्धः स चानुपपन्न इति भावः भावनाविषयत्वे चेति भावनाया विषयत्वे चेत्यर्थः फले तत्र ये जन्यतासम्बन्धेन फलेऽन्वये प्रत्ययत्वमिति कर्त्राख्यातस्थलेऽप्रसङ्गमित्यर्थः तथा च तत्राख्यातार्थान्वये व्यभिमान
त्वादेधात्वर्थस्यान्वयापत्तिवारणाय धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रत्याख्यातपदजन्योपस्थितेविषयतासम्बन्धेन हेतुत्वस्य कल्पनात् धात्वर्थविशेषणा
त्वेनतिरूर्ध्वं कृतेरन्वय इति भावः क्वचनलिधायकेति क्वचन विधायको भावकर्मविहितलकारस्य प्रयोगेन भावनाकृतं प्रत्येकोऽस्त्वन्यतमस्यपरमर्थः कुत्रचिद्वादिति चेत्रेणाग्रमित्यादि भावादिविहितलका
रस्य यस्य स्थले कृत्वादित्यर्थः तथाविधलकारस्य स्थले स्वार्थकृतिनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दं प्रतिधात्वजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वस्य कृतावान्वयकृतिप्रकारकक्रिया
विशेष्यकबोधे बाधकाभाव इति भावः नन्वाख्यातस्य कृतिकर्मत्वाभिधायकत्वे चैत्रेणापच्यत तण्डुलः तण्डुलं पचति चैत्र इत्यादिप्रयोगापत्तिरित्यत आह कर्तृकर्मवदिति वैयाकरणमते यथा कर्त्राख्यातत्वेन
रूपाकृतत्वावच्छेदकं यथा च कर्माख्यातत्वं कर्मत्वाकृतावच्छेदकं तथा नैयायिकमते पि कर्त्राख्यातत्वं कृतिशक्ततावच्छेदकं एवं कर्माख्यातत्वं कर्मत्वशक्ततावच्छेदकमित्युपदर्शितस्थले कृतिकर्मत्वयोर्बोध
भाजनोपदर्शितप्रयोगापत्तिरिति भावः कृतिकर्मत्वयोः शक्ततावच्छेदके कर्त्राख्यातत्वकर्माख्यातत्वे वाच्ये तेनाख्यातत्वमित्यत्रोपपत्त्यभावात्तमाह नवेति तथा सति पच्यते तण्डुलो मैत्र इत्यादिप्रयोगापत्ति
रपि दुर्वारेति भावः केचित्तु आख्यातत्वमेव कृतिशक्ततावच्छेदकं लाघवात् न चैवं तत्र प्रयोगापत्तिः कृतिविशेष्यकाख्यातपदनिरूपितशाब्दज्ञाने नकृतिबोधे जननीये चैत्रस्तण्डुलं पचतीत्यादावेव
पर्वीतानयसहकारित्वकल्पनात् एवं कर्मत्वविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन कर्मत्वबोधे जननीये चैत्रेण पच्यते तण्डुल इत्याद्यानुपूर्वीज्ञानस्य सहकारित्वकल्पनाच्चोपदर्शितापत्तेरभावादिति
एवमन्यत्रापत्तिशङ्का पक्षोणापत्तिदानुपूर्वीज्ञानसहकारित्वरूपसत्तिलयथायोग्यानीत्युपनीयत इति प्राहुः नन्वकर्माख्यातस्य चेत्कृत्यपरनामकभावनार्थत्वं कुतो भावनान्वयिनि सङ्ख्यानुयनियमः चैत्रेणापच्यतेत
ण्डुलः स्थालीभावनान्वयिनि तण्डुले सङ्ख्यान्वयेनव्यभिचारादित्यत आह तिङ्प्रस्थापयतीति तथा च सङ्ख्यायाः प्रथमान्तोपस्थाप्यस्यैवान्वयनियमेन तद्भावनान्वयिनि तत्स्यान्वयनियम इति भावः न
न्वाख्यातोपस्थाप्यार्थान्वयिन्येव सङ्ख्याया अन्वयनियमः किन्तु प्रथमान्तस्यापि कर्माख्यातस्थले तदुपपन्नभाव इति चेन्न तथा नियमाङ्गीकारे स्वपतीत्यादौ वर्तमानत्वादिविशिष्टेपि सङ्ख्यान्वयप्रसङ्गा
दिति कर्तृकर्मविहितत्वाख्यातस्त्रिन्नयापादकं कर्मविहितलकारस्य यस्मिन्नुपपादयतीति चैत्रेण गन्तव्याद्यर्थात्मनेपदस्य कर्तृकर्मणी कदाचोदयनेनान्वयः कर्त्रादिविहितलकारः कर्त्रादिवाचकत्वे चैत्रेण गन्ते
त्यादौ समानलिङ्गकत्वनिर्देशानुपपत्तेः समानलिङ्गकस्थले भेदान्वयबोधस्याव्युत्पन्नत्वात्तस्य निर्वाहादिति भावः नन्वनादेशादभवेमानाभावस्तमत आह भोक्रादयः नीत्यादि स्त्राच कृत्स्नस्य यस्य कर्त्रा
दिवाचकत्वे भोजनानुकूलकृतिमत्त्यनीत्यायन्वयबोधः स्यात् स च विशेषदर्शनाभावपन्नत्वे इति विशेषदर्शिनां नानादृष्टान्तवाक्याद्भोजनानुकूलकृतिमास्त्यनीत्यायन्वयबोधोपपत्त्यर्थं कर्त्रादिविहितलकारः कर्त्रा
दिवाचकत्वमावश्यकमिति भावः सामानाधिकरण्यादीति अभेदान्वयबोधादीत्यर्थः आदिना भोक्तारमानीत्यादौ भोजनानुकूलकृतिमांस्त्यनीत्याद्यन्वयबोधपरिग्रहः ननु कृत्प्रत्ययस्य कर्त्रादिवाचकत्वेन
तेत्यादौ धात्वर्थान्वयानुपपत्तिः कर्त्रादेः कृत्यादिविशिष्टरूपतया कृत्यादेः पदार्थैकदेशत्वेन तन्नानुकूलत्वादिसम्बन्धेन धात्वर्थगमनादेरन्वयासम्भवादित्यत आह चैत्रस्य नेत्रमादिनप्रपक्षस्य जन्यपुरुषज
न्यपुरुषपुत्रपुत्रवाचकतया जन्यत्वस्य पदार्थैकदेशत्वेपि तत्रैव चैत्रस्येतिषष्ठ्यर्थसम्बन्धेन सम्बन्धित्वस्यान्वयः जन्यपुरुषजन्यपुरुषवृत्तिपरपदार्थैकदेशे चैत्रसम्बन्धित्वस्यान्वये चैत्रपुत्रेपि चैत्रस्य नेप्तत्प्रयोग
प्रसङ्गात् तथा च तत्र यथा पदार्थैकदेशेऽन्वयस्तथा चैत्रो गन्तेत्यादौ पदार्थैकदेशे बोधाङ्गीकारेपि न क्षतिविरह इति भावः नन्नु जन्यपुरुषजन्यपुरुषत्वस्य नप्तृपदशक्यतावच्छेदकत्वे विशिष्टे शक्तिकल्पने गौर
वात् प्रातदपराजन्यत्वं वृत्तं पुरुषत्वे चेति शक्यतावच्छेदकद्वयमेव तत्रास्तु सम्यक् तथा च चैत्रस्य नेप्तत्यादौ चैत्रसम्बन्धित्वस्य जन्यत्वे न्वयः जन्यत्वस्य च पुरुषेऽन्वयः पुरुषस्य जन्यत्वेन्वयः जन्यत्वस्य पुनः पुरुषेऽन्वय

यत्तत्त्वेवंरीत्या चैत्रसम्बन्धित्वस्य तात्पर्याभिव्यञ्जकपदान्यतमः श्रूयमाणत्वमयबोधस्य विनैकदेशेऽन्वयः नृपदर्शितरीत्या नो सम्भवत्युक्तिकरतिव्युत्पत्तेरेतदाह मैत्रादन्यस्मादित्यादि ग्रन्थं भावः अन्यपदस्य भेदपर
शक्यतावच्छेदकः ननु भेदप्रत्ययत्वे गौरवान्नमदादिपदस्य बोधान्वयानुभवात् एतेनान्यपदस्यापि रवुक्तशक्तिकल्पनं निरस्तम् तथा च मैत्रादन्यस्मादित्येकपदार्थप्रतियोगित्वस्यान्यपदार्थैकदेशे भेदेऽन्वयो विने
कदेशान्वयस्वीकारमनुपपन्नः एवं तु दारादिपदसमभिव्याहारे एकदेशार्थैकदेशे प्रत्यक्षेऽपि स्वार्थतावच्छिन्नस्यान्वयोऽपि तथा तथैव नु दारादिपदसमभिव्याहारे न जन्यजनकत्वविशेषेऽपि गुणवति लक्षणया पदार्थैकदेशे विशेषेऽधिगुणे
पञ्चम्यन्तपदार्थान्वयेन तु दाराधिकपदस्य विशेषाधिगुणे वा निरूपितत्वान्वयबोधोऽपि तथा च नैमित्तिकत्वस्य पदस्य नैमित्तिकदेशान्वयस्वीकारे बाधकाभावः इति ननु गौणीनिरूपणसम्भवः अस्तु रित्यादौ गोत्वपशुत्वादौ नियतत्व
पशुत्वमिति तयोरपृथग्बोधात् पश्चात्किंचिन्मतार्थनिरूपकतावच्छेदकविशेष्यता समन्वयेन शान्तबुद्धिः प्रति पृथग्विशेष्यता सम्बन्धेन पदजन्यपदार्थोपस्थितेर्हेतुत्वात् तथा च स्वपदार्थानां विशेष्यता सम्बन्धेन पदार्थोपस्थितिः
करणेऽन्योन्यप्रकारत्वेन सम्बन्धित्वस्य पदान्तरस्मात्तदाह तत्र चेति कार्यतावच्छेदकसम्बन्धविशेष्यतायां न च पदार्थत्वात् विशिष्टविशेष्यत्वेन तथैव विशेष्यता नैव मनोऽर्थः साकाङ्क्षत्वादिति पदबोधपदार्थोपस्थितिः कार्यकार
णभावस्य कल्पनीयत्वादित्यर्थः तथा च तत्त्वाद्यनुपपत्त्या गुरुरपि तत्त्वकार्यकारणभावः स्वीक्रियत इति भावः न च चैत्रस्य नप्तादौ जन्यताप्रयोजकगुरुपदजन्यत्वे परम्परासम्बन्धेन पदार्थोपस्थितिः न चैव नप्तृपदा
र्थैकदेशान्वयोऽन्यत्र गुरुत्वं पदजन्यपुरुषेऽन्वयः ननु पदार्थैकदेशे जन्यत्वे चैत्रनिरूपितत्वरूपसम्बन्धस्य सम्भवस्यान्वयः तथा सम्बन्धपदर्शितकार्यकारणभावेन न पदार्थान्तरिक्तत्वेन निरूपितविशेष्यतायोगिनि वेद्योगोऽस्ता
न तथा च नो ऽत्र परत्वानामवकाशः परस्मात्तदाह अस्तु वेति कृत्यादिहरितपदवेति स्वातन्त्र्येण लकृतिमत्त्वादिरूपपरम्परासम्बन्धेन पदार्थः कञ्चिदिना समन्वयेरिति कृत्यात्मपार्थककर्तृत्वादेवात्तरगमनादिप्रकारकतया
धेयप्रकारतावच्छेदकसम्बन्धस्यार्थः तथा च तत्र एतदर्थेषु पदर्शितपरम्परासम्बन्धेन पदार्थस्यैवान्वयः स्वीक्रियते यथा च चैत्राद्न्यस्मादौ स्वाश्रयभेदवत्सम्बन्धेन भेदविशिष्टे चैत्रप्रतियोगित्वस्यान्वयः नत्वेक
देशान्वयोऽपि तथा गन्तृत्वादावपि कर्त्रादिरूपकल्पनायार्थत्वात् कृतिमत्त्वादिरूपपरम्परासम्बन्धेन गमनादेरन्वयो न तु पदार्थैकदेशेऽपीति भावः ननु चैत्रेण गतो ग्रामस्तथादौ कृत्याश्रयेन कर्मादिगतसङ्ख्या
न भिधानाद्वितीयाद्यापत्तिरितस्तत्राह कृत्वेत्यादि फलादीत्यादिपदेन विषयत्वादिपरिग्रहः कर्त्राद्यादिपदेन च रथो गच्छतीत्यादावाश्रयत्वादिपरिग्रहः द्वितीयादेरन्यस्मादिनाततीयापरिग्रहः अत्र चेति चैत्रे
णगतो ग्राम इत्यादौ चेत्यर्थः विशिष्टाभिधानस्येति कर्मत्वादिविशिष्टस्य बोधनेत्यर्थः विशेषणस्याप्यभिधानादिति कर्मत्वादेरपि बोधनादित्यर्थः तथा च कृत्याश्रयेन यत्र विशेषणविधया विशेष्यविधया वा
कर्मत्वादिकं बोध्यते तत्र द्वितीयादिरपि नियमः स्वीक्रियते नत्वेकमादिगतसङ्ख्यानभिधानं द्वितीयादिनियमः तत्र वो ज्ञातुमपत्तिरिति भावः कस्यचिन्मते तु यद्यपि तत्तन्मतमनुवदति यत्तित्यादि धात्वर्थप्रत्ययत्वे
न कृतौ शक्तिरिति धात्वर्थप्रत्ययत्वमेव कृतिशक्तितावच्छेदकमित्यर्थः तथा च शक्ततावच्छेदकलाघवात्त्वमेव कृतावेव शक्तिः न त्वाख्यातस्य कृतौ शक्तिः कृत्याश्रयस्य च कर्तरि शक्तिरिति तथा सति विभिन्नशक्तता
वच्छेदकादिकल्पने गौरवादिति भावः ननु कृत्याश्रयस्य कृतिपाकृत्वे देवदत्तः पाचकस्त्यादौ देवदत्तादिपदार्थेऽपि पाकादेर्थस्य कपमभेदान्वयबोधस्तत्रभेदान्वयबोधस्यैवानुभवसिद्धत्वात् प्रकारान्तरस्य चक्रमशक्य
त्वादित्यत आह पाचकादिपदे त्वित्यादि समानाधिकरणप्रत्ययरोधात् अभेदान्वयबोधानुरोधात् लक्षणेतीति तथा च तत्र तथान्वयानुभवस्य कृत्याःकर्तरि लक्षणयेव निर्वाहः लंतत्र शक्तिकल्पनमपीति भावः भाव
कृतोऽपीति शक्ततावच्छेदकावच्छिन्नस्य प्राप्यबोधकत्वनियमादिति भावः ननु धात्वन्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वे पि भावकृतोऽनकृतिबोधकत्वं तत्प्राविषयबोधेऽभावकृदादिव्याख्यानात्तु प्रवीविशेषस्य
त्वनियामकत्वाभ्युपगमादित्यत आह धात्वादित्युदितेत्यादि आदिपदात्समन्वयत्वादिपरिग्रहः तस्माद्वात्वन्तरप्रत्ययत्वाद्युक्तावधानतम तद्विना धात्वत्वस्य प्रकारान्तरेण निवेशमशक्यत्वात् एवमाख्यातत्वाद्यनम
त्वविना प्रत्ययत्वस्यापीति तदपेत्यत्वोऽपि सम्बन्धेनाख्यातत्वेन रूपाख्यातत्वस्यैव लङोः कृतिशक्ततावच्छेदकत्वो विघ्नादिति भावः एतेनाख्यातमात्रस्य कृतिवाचकत्वे कृतिशक्ततावच्छेदकमाख्यातत्वं एवं च तः
कर्तृमात्रवाचकत्वे तत्प्रत्ययत्वं कर्तृशक्ततावच्छेदकमिति गौरवमेतदपेतया एकस्यैव धात्वन्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वं चितमित्यपि निरस्तम् प्रत्ययत्वस्याख्यातत्वकृत्त्वादितत्त्वे नलाघवात
वकाशादिति कृतौ शक्तिरिति कृतिविशिष्टे कर्तरि तत्त्वतः शक्तिकल्पनेनन्त्वकृतौ तत्र तावच्छेदकत्वे गौरवम् कृतौ न कल्पनेन तत्र कृतित्वजातेरेव तच्छक्ततावच्छेदकत्वे लाघवमिति तत्रैव तत्कल्पनमुचि
तमिति भावः यत्रस्मादिशब्दत्वा सम्भवादित्यस्य गवादिपदानां गोत्वविशिष्टशक्तिमत्त्वेनान्वयः ननु गवादिपदस्य गोत्वविशिष्टशक्तिकल्पनस्यावश्यकतया लाघवान्नैव तत्कल्पनमस्त्वित्यत आह गोत्वत्वा
दिनेत्यादि गोत्वत्वस्य गवेतरासमवेतत्वे सति निखिलगोनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वरूपतया गौरवादिति भावः विशिष्टानवगाहिनीति [illegible] विशिष्टमन्त्रवाविशिष्टगोचरीनामित्यर्थः शक्यत्वमपि नि ग्राह्यशापद

२१ (१) तत्त्वकौमुदि पत्र साध्यत्वे नञ्पदकर्मत्वादिकं तद्धर्मनिष्ठत्वेऽनियतत्वनियमात्सर्वतः

ग्रा॰ वा॰ टी॰ ८

8

महत्त्वादिशक्यत्वमित्यर्थः तत्रापि शब्दादिविशिष्टे शक्तिकल्पनेन तत्र शब्दादेः शक्यतावच्छेदकत्वस्वीकारे गौरवं शब्दत्वादौ तच्छक्यत्वकल्पने तु शब्दत्वादिजातेः शक्यतावच्छेदकत्वस्वीकारे लाघ
वमित्यर्थः तत्रापि शब्दादिविशिष्टे शक्तिरिति तत्र शब्दादेरेव शक्तिकल्पनस्यादिति भावः तत्पएवेति कृत्यन्तस्य यस्य लोपिसु विशिष्टरूपार्थः तथा च पृथा शब्दादावाकाशादिपदस्य स्वारसिकप्र
योगाभावान्न तत्र शक्यत्वं तथा कृतावपि कर्त्रविहितकृत्त्व यस्य स्वारसिकप्रयोगाभावान्नापि तत्र शक्यत्वमिति भावः ...कस्य चिन्त्रत्वहेतु व्यत्तमिति दर्शयति एवमिति यत्र यके चिद्
त्वत्वेन एवं च कर्मविहितकृत्कर्मविहितत्वात् योः फलबोधकत्वव्यवस्थापनेनेत्यर्थः लाघवादिति फलानुकूलविशिष्ट... कल्पनापेक्षया शरीरलाघवसम्भवादित्यर्थः अनन्यलभ्य इति
एतेनानन्यलभ्यो हि शब्दार्थ इति नियमस्यापि न भङ्ग इति सूचितम् व्यापारविशिष्टमात्रमिति गमनत्वादिविशिष्टमात्रमित्यर्थः मात्रपदेन व्यवच्छेद इति स्थितावपि इति व्यवस्थितावित्यर्थः ननु
व्यापारमात्रस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ फलत्वेन कर्मत्वस्य कर्तृत्वाभरत्वमात आह ग्रामं गच्छतीत्यादि ...त्यान्तकुद्दे... दाहरणद्वयं द्वितीयादेरिति आदिना ग्रामस्य गन्तव्यतादोष... परि
गृहः फलजनकत्वलक्षणमिति फलत्वमत्र जन्यत्वइत्यम फलत्वविशिष्टजनकत्वस्य हि द्वितीयार्थत्वे ग्रामं गच्छतीत्यादौ परसमवेतधात्वर्थजन्यफलशालित्वलक्षणकर्मत्वस्य बोधप्रकारमाह
फलेचेत्यादि चैत्रस्पन्दनेत्यादिवदेकदेशान्वयस्वीकारेण तथान्वयबोधस्वीकारे तत्र विशिष्टेत्यनयोपदर्शितकर्मत्वस्यापि बोध इति भावः फलजनकत्वे द्वितीयादेः शक्तिकल्पने गौरवात्तदपहाय
फले शक्तिः जनकत्वं तु संसर्गमर्यादया भासत इत्यस्येव सम्यक्त्वात्तथैवाह फलमात्रेवेति जन्यत्वविशिष्टवेत्यर्थः फलसामान्यलाभेपीति जन्यत्वविशिष्टलाभेपीत्यर्थः निष्पत्तेति लक्षणोपस्थि
तिष्वाक्तिभ्रमाकालीनेत्यर्थः संयोगविभागाद्यलाभादिति संयोगविभागत्वादिना संयोगविभागादिरूपफलस्यालाभादित्यर्थः तस्मादिति सर्वमते उपदर्शितदोषसम्भवादित्यर्थः फलविशेषाव
च्छिन्नेति संयोगत्वादिविशिष्टजनकेत्यर्थः ननु लक्षणोपस्थित्याद्यभावकाले तथाविधबोधाभावे इति विरहस्य तोटोपान्तरमाह अन्वयेति व्यापारमात्रस्य धात्वर्थत्वे चा... इत्यर्थः पर्यायतापत्तेरिति
एकशक्यतावच्छेदकावच्छिन्नशक्तानानापदसंवपर्यायपदार्थत्वादिति भावः प्राङ्क्तेन त्यागीत्यादि संयोगत्वादिविशिष्टावच्छिन्नव्यापारस्य धातुशक्यत्वादिनोपीत्यर्थः संयोगादिषापत्तिरूमित्यादि
जन्यत्वरूपफलत्वावच्छिन्नस्यैकस्यैकोपस्थानादिवाच्यत्वेनुफलान्तरस्यापि बोधसम्भवादिति भावः तदवच्छिन्नेति संयोगत्वादिविशिष्टावच्छिन्नेत्यर्थः तथा च तत्र समभिव्याहारविशेषस्यैव तथा कार्यतावच्छे
दकत्वादिति भावः समभिव्याहारविशेषस्य सामान्यधर्मावच्छिन्नबोधकपदस्य विशेषबोधकत्वे हेतुत्वमाह यथेत्यादि अग्रवदेतदिति तथा तत्र यदिच्छप्रत्ययेन स्वर्गबोधकत्वे तदा प्रकृते फलत्वरूपेण संयोगा
दिबोधकत्वं यदि च तत्र ...स्वर्गपुरमेदान्वयेन स्वर्गादिरूपफलबोधकत्वं तदा प्रकृते संयोगादिफलयोरभेदान्वयेन संयोगादिबोधकत्वमिति भावः ननु सामान्यधर्मावच्छिन्नबोधकपदस्य सामान्यरूपेण विशेषबोध
सम्भवेपि गम्यते ग्राम इत्यादौ संयोगत्वादिना संयोगस्य ग्रामेवन्वितत्वबोधो न स्यादत आह नन्वसंयोगफलयोरभेदान्वयेन बोधसंयोगत्वरूपेण तथाबोधसम्भव इति वाच्यम् इतरविशेषणत्वेनोपस्थितस्यान्यत्र वि
शेषणत्वेनान्वयेऽविवक्षितत्वेनानन्वयास्सम्भवादित्यत आह अस्त्वेवेति तथा च यत्तु विशेषविषयत्वेहरूपसामान्यधर्मावच्छिन्नशक्तत्वदापि तत्तत्पदत्वस्ति पे विशेषरूपेण बोधस्तथापि प्रकृते न फल
त्वरूपसामान्यधर्मावच्छिन्नशक्तस्याता संयोगत्वादिरूपविशेषरूपेणबोधः यत्र मावच्छिन्ने पदनिरूपितशक्तिग्रहस्तेन रूपेण पदस्य बोधजनकत्वमिति नियमस्येतरतिरिक्तस्थलत्वादिति भावः इदं च नदादिसि
वेनामपदस्य शक्यतावच्छेदकं बुद्धिविशेषविषयत्वमेव शक्तिग्रहोपि न तु सामान्यावच्छिन्नत्व एव बाधस्तदोषोस्य बुद्धिस्थतिसाम्यम् इत्... नानुद्धिविषयत्वदादिपदशक्यतेत्या... इति प्राचीनमतानुसारेण
बोध्यम् ननु तदादिपदवित्युपित शक्तिज्ञानात्ज्ञानत्वे नचेदं त्वादिप्रकारकपदनिरूपितशक्तिग्रहात्स्वरूपतो बुद्धित्वादिप्रकारकबोधापत्तिकारणप्रवृत्तिरिव्व ... निरवच्छिन्नप्रकारक
केन ...निरवच्छिन्नप्रकारताकसम्बन्धेन शाब्दबुद्धित्वप्रतिनिरवच्छिन्नप्रकारतासम्बन्धेन पदनिरूपितशक्तिज्ञानस्य हेतुत्वकल्पनस्यावश्यकत्वात्तथा च फलत्वविशिष्टे शक्तिज्ञानादिपदनिरूपितशक्ति
ज्ञानात्संयोगादिना भानेबोधस्तदा संयोगत्वे उपदर्शितसम्बन्धेनोपदर्शितकारणविरहात् न च विषयभेदेन तादृशकार्यकारणभावकल्पने प्रकृतस्य लेस ... कल्पनेतिवाच्यम् विषयभेदेन कार्यकारणभा ८
वकल्पने गौरवात् न च तदादिपदस्तदिवसहानशाब्दबोधान्नुपपात्तिपपत्या तथाकल्पनमावश्यकमिति वाच्यम् अनेन कार्यकारणभावकल्पनापेक्षया तदादिपदानां विशिष्टशक्तिकल्पनस्यैवोचितत्वादिति प्रकृते
पि विशिष्य शक्तिरावश्यकी त्यपि प्रायेण प्रकाशान्तरेण कमतनिर्वचनस्वरवेन व्यापारमात्रस्य धात्वर्थत्वं दूषणमाह अपि चेति धात्वर्थतावच्छेदकफलेति धात्वर्थतावच्छेदकतावच्छेदकविशिष्टफलेत्यर्थः तथा च

कर्मत्वस्येत्यादि अत्र तद्धात्वर्थगमनादिक्रियाजन्यविभागरूपफलस्य पूर्वदेशेऽपि सत्त्वात् गमित्यजोः पूर्वदेशस्यापि कर्मत्वापत्तिरेवं त्यजिक्रियाजन्यसंयोगरूपफलस्योत्तरदेशे सत्त्वात् उत्तरदेशस्यापि त्यजेः कर्मत्वा
पत्तिः तथा स्पन्दजन्यविभागादिफलस्य पूर्वापरदेशयोः सत्त्वात्तस्य तदुभयत्र कर्मत्वापत्तिरतो न तथात्वर्थजन्यफलशालित्वं कर्मत्वं किं तु धात्वर्थतावच्छेदकफलशालित्वं तत्र च नोपदर्शितानुपपत्तिः उत्त
रसंयोगरूपफलस्यैव गमधात्वर्थतावच्छेदकतया तस्य च पूर्वदेशेऽभावात् एवमग्रे संयोगस्य पतेरवच्छेदकत्वात्तस्य च पूर्वदेशेऽभावात् गमित्यजोः पूर्वदेशे कर्मत्वापत्तिः एवं विभागस्य त्यजिक्रिया
वच्छेदकतया तस्योत्तरदेशेऽभावान्नोत्तरत्र त्यजेः कर्मत्वापत्तिः स्पन्देश्चावच्छेदकफलाभावेन नोभयत्र कर्मत्वापत्तिरिति व्यापारमात्रस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ कर्मत्वबोधानुपपत्तिरेव दोष इति भा
वार्थोऽवसेयः ननु तत्तद्धात्वर्थजन्यतत्तत्फलशालित्वमेव कर्मत्वं भिन्नं न त्वनुगतकर्मत्वमस्तु अनुगतकर्मत्वनिर्वचने प्रयोजनाभावादतोऽनुगतकर्मत्वनिर्वचनप्रयोजनमाह फलावच्छिन्नेति फलजनकेत्यर्थः
सकर्मकत्वव्यवहार इति तथा चानुगतकर्मत्वानिर्वचनेऽनुगतसकर्मकत्वव्यवहारस्य विलोपप्रसङ्ग इति भावः नन्वेवं सति कथं जानातीत्यादौ सकर्मकत्वव्यवहार इत्यत आह आश्रयस्येति लाक्षणिकेत्यर्थः
तथा चोपदर्शितसकर्मकत्वं मुख्यसकर्मकत्वव्यवहारनियामकं विषयत्वादिकं तु भाक्तसकर्मकव्यवहारनियामकमित्यतो न दोष इति भावः नन्वननुगतमेव कर्मत्वमस्तु अननुगततया व्यवहाराभावे दोषापत्ति
रत आह तादृशधात्वयोगपदं चेति उपदर्शितधात्वयोग इत्यर्थः तथा चानुगतकर्मत्वानिर्वचने सकर्मकधातुयोगे कर्मप्रत्ययविधानस्याननुगतत्वापत्तिरिति भावः अत्रेदमवधेयम् यद्यपि धात्वनुगतत्वसनदर्थ
तावच्छेदकत्वस्यैवाभावेन धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वमपि नानुगतम् एवं तादृशसकर्मकत्वविरहेऽपि जानातीत्यादौ यथा तत्तद्धातुयोगे कर्मविधानं तथा विशिष्य गम्यादियोगेऽपि कर्मप्र
त्ययविधानं सम्भवत्येव तथा च तत्तद्धात्वर्थत्वेऽपि न दोषः तथापि तत्तद्धात्वर्थतत्तत्क्रियाजन्यफलशालित्वरूपाननुगतकर्मत्वमनुसृत्यापि व्यापारमात्रस्यैव धात्वर्थत्वे त्यजिगम्योः पर्यायतापत्तिदोषो दुरुद्धर एवेति ननु
फलावच्छिन्नव्यापारस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ ग्रामादिरूपनामार्थस्य कुत्रान्वयः न तावद्धात्वर्थैकदेशे फले नामार्थधात्वर्थयोर्भेदेनान्वयबोधानभ्युपगमादत आह तत्रेति ग्रामं गच्छतीत्यादावित्यर्थः ।
तद्वृत्तीति द्वितीयार्थवृत्तित्वे चेत्यर्थः आकाङ्क्षावैचित्र्यादिति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेः सङ्कोचकल्पनादित्यर्थः तथा च तत्रैव ग्रामादिरूपनामार्थस्यानुयोगितया धात्वर्थैकदे
शफले इति भावः ननु ग्रामं गच्छतीत्यादौ धात्वर्थकर्मकारकस्याधिकरणत्वेनान्वये कर्मणि द्वितीयेति सूत्रस्य अनुपपत्तिः न च कर्मवत्सप्तम्यधिकरणे चेत्यत्र द्वितीयासप्तम्यावधिकरणे चेति करणे
नैव निर्वाहादित्यत आह अत एवेति धात्वर्थतावच्छेदकफले द्वितीयार्थवृत्तित्वस्यान्वयादेवेत्यर्थः तथा च सप्तम्यर्थवृत्तित्वस्य धात्वर्थशक्तिमुख्यविशेष्यत्वेऽन्वयः द्वितीयार्थवृत्तित्वस्य धात्वर्थैकदेशफलेऽ
न्वय इति सूचनार्थं तत्र एष कर्तृत्वग्रहणमिति भावः नन्वेवं सति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेः सङ्कोचकल्पने गौरवमित्यत आह अस्त्वेवेति फलमर्थ इति तथा च फलावच्छिन्नव्या
पारस्य धात्वर्थत्वेऽपि फलमेव द्वितीयार्थः तच्च जनकतासम्बन्धेन धात्वर्थेऽन्वेति आधेयत्वं तु द्वितीयार्थकर्मकारकयोः सम्बन्धमर्यादया भासते तथा च ग्रामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगविशिष्टसं
योगानुकूलगमनानुकूलकृतिरित्येवान्वयबोध इति भावः ननु तथापि विषयताजन्यबोधे संयोगस्य वारद्वयभानमवश्यं विरुद्धमित्यत आह संगेति न चैवं गमित्यजोः पर्यायतापत्तिरिति वाच्यम् य
दृशकत्वावच्छेदकतापकधात्वर्थतावच्छेदकत्वं यत्र नेति तत्पदानामेव पर्यायत्वादिति भावः ननु फलव्यापारयोर्धात्वर्थत्वे तत्र कथं फलजनकव्यापारबोधनिर्वाह इत्यत आह विशिष्टेति
ति जनकतासम्बन्धेन फलविशिष्टव्यापारत्वमित्यर्थः अन्वयबललभ्य इति फलव्यापारयोः परस्परमन्वयाल्लभ्य इत्यर्थः तथा च व्युत्पत्तिवैचित्र्यादेकपदार्थयोरपि परस्परमन्वयबोधस्वीकारेण तथावि
धविशिष्टबोधनिर्वाह इति भावः ननु धात्वर्थतावच्छेदकफलशालित्वरूपस्य कर्मत्वस्य पतनेऽपि भूमिं प्रयातीति विहङ्गस्यादिवत्स्वात्मानं प्रयातीति विहङ्गस्यापि कर्मत्वापत्तिः तत्र संयोगादिरूपफलस्य विह
ङ्गतयासमवेतेऽपि तादृशफलाश्रयत्वसम्भवेन स्वात्मवृत्तितादृशफलानुकूलव्यापारेऽनुकूलकृतिमत्त्वविहङ्गस्यादिपातबोधसम्भवादित्यत आह भूमिं प्रयातीत्यादि क्रियावधीति एतेन परसमवेतत्व
स्य द्वितीयार्थत्वेऽपि तस्य फलेऽन्वये संयोगादिरूपतत्फलस्य विहङ्गतयास्वात्मवृत्तित्वेन तथाविधप्रयोगवारणसम्भवात् तन्निरस्तम् ननु परसमवेतत्वमित्यत्र किमपेक्ष्य परत्वं विवक्षितं प्रकृतधात्वर्थापेक्षयेति
चेत् चैत्रेण ग्रामं गम्यत इति प्रयोगापत्तेः तत्र प्रकृतधात्वर्थगमनाश्रयत्वात् अत आह स्वार्थेति विशेषणं वक्ष्यमाणदूषणपरत्वमित्यादिना तिङादीनां कर्मकर्तृत्वादिग्रहः स्वार्थेति
स्वार्थीयफलतदाश्रयेत्यर्थः इदं च फलावच्छिन्नव्यापारयोर्धात्वर्थत्वपक्षे फलव्यापारयोर्धात्वर्थत्वे तत्तदेव ... प्रत्ययार्थकर्तृकत्वमाश्रयत्वे तत्कर्मत्वे दोषः तथा च ग्रामं गच्छतीत्यादौ ग्रामा

ग्रा॰ वा॰ टी॰ ९

9

त्वरत्रिर्वो ग्रामहति संयोगानुकूलत्वस्यन्दनलदत्तत्वात्कृतिरित्येवान्वयबोधः एवं ग्रामो गम्यत इत्यादौ ग्रामस्य त्रिर्यः संयोगानुकूलस्य स्पन्दस्य जन्यफलं तं प्रत्यश्रयता तत्वाग्रामस्य तत्र बोधात्
भावः न तु स च द्वितीया समभिव्याहृतस्थले फलादेर्धात्वर्थत्वे विजानातीत्यादिप्रयोगानुपपत्तिः ज्ञानजन्यफलस्य घटादावदृष्टत्वेन च तत्र त्रर्भावेनान्वयबोधासम्भवात् एवं सर्वत्र परस्मैपदेन
कर्मप्रत्ययार्थ इत्यपस्मृते ग्रामो ग्रामं जानातीत्यादिप्रयोगानुपपत्तेः ग्रामस्य इति तस्य ज्ञाना दावप्रसिद्धात् तत्रान्वयबोधासम्भवादित्यत आह ग्रामं जानातीत्यादि विषयत्वमिति कर्मेति अ
दिस्थले द्वितीयार्थो निष्ठायेण विषयत्वमिति तत्कर्मेत्यादि स्थले त्राख्यातार्थो निष्ठायेत्यर्थः द्वितीयये प्रस्य कर्मणो त्यादिस्थले तादिः तथाच सविषयकार्थबोधकधातुसमभिव्याहृतद्वितीया
समभिव्याहृत तथात्वस्थले फलादेर्धात्वर्थत्वनियमः एवं च नाहमा धातुस्थले कर्मप्रत्ययस्यापरसमवेत नस्मर्थो नान्यत्वेतिभावः तथा ति तत्र तत्रान्वयबोधप्रकारमाह अन्वयबोधेविति एकत्रेति कर्म
ख्यातस्थलेर्त्यर्थः अन्यत्रेति कर्माख्यातस्थलेर्त्यर्थः न तु विषयत्वादेः कर्मप्रत्ययार्थत्वे ज्ञातो घटः इत्यत्र विषयत्वस्य घटांशे भेदान्वयबोधासम्भवः नामार्थयोर्भेदान्वयबोधानङ्गीकारादत आह भेदाः
न्वयबोधः बाधादित्यत आह ज्ञानरत्नादि तथाचाख्यातस्थले कर्मप्रत्ययस्य विषयत्वादिकमर्थः कर्मणिक्तस्य च विषयादिकमर्थः तस्याश्रयमात्रार्थे भेदान्वयः नामार्थयोर्भेदेनान्वयबोध
स्य सर्वसंमतत्वादितिभावः न तु सर्वत्र स विषयकधात्वर्थे विषयितया इत तद्दार्थस्यान्वयाङ्गीकारे श्रुत्त्रा भोजनीयमतन्नेतिप्रयोगानुपपत्तिः तत्र तत्रभोजनविषयकत्वाभावादित्यत आह यत
इत्यादि तथाच यतिपदार्थातिरिक्तस विषयधात्वर्थे सर्वत्र विषयित्वेनेतरपदार्थान्वयो न तु रूपत्वेनेतिभावः अत एवेति यतो यतिपदार्थे उद्देश्यत्वेनैवेतरपदार्थान्वयो न तु विषयित्वेनात एवेत्यर्थः अपि च
ज्ञानेपीत्यादि अन्यथा तत्र तदा भोजनविषयकत्वाभावेन तथाप्रयोगानुपपत्तिरितिभावः मतुन मतं हृषयितं तन्मतं दर्शयति धातोरर्थः फलमिति तथाच फलानुकूलव्यापारे धातोः शक्तिवादिनोपि फ
ले शक्तिकल्पनस्यावश्यकतया तत्रैव तत्कल्पनमुचितमिति भावः ननु एवं सति गच्छतीत्यादौ संयोगरूपफलानुकूलव्यापारबोधस्यानुभवसिद्धस्य कथं निर्वाह इत्यत आह अनुकूलव्यापारस्तु इति पदार्थैक
देशे तयानङ्गीकारे त्वाह व्यापारमात्रवेति ननु केवलव्यापारस्याख्यातार्थत्वे गच्छतीत्यादौ धात्वर्थसंयोगाख्यातार्थव्यापारयोः कथं जन्यजनकभावलाभ इत्यत आह जन्यजनकभावस्त्वादि ननु सर्वत्र फ
लस्य धात्वर्थत्वे गच्छति यजेतेत्यादौ संयोगस्वर्गादिरूपफले वर्त्तमानत्वे साधनत्वादेरभावात्तदन्वयानुपपत्तिरित्यत आह तत्रेत्यादि तत्राख्यातार्थवर्त्तमानत्वादिके लिङ्घात्वर्थे इष्टसाधनत्वादिकमित्यर्थः
वर्त्तमानत्वादीत्यादिनो भविष्यत्वादिपरिग्रहः इष्टसाधनत्वादीत्यादिना कृतिसाध्यत्वपरिग्रहः एकपदोपात्तत्वेति एकपदजन्योपस्थितिविषयत्वेत्यर्थः तत्रैवेति व्यापार एवेत्यर्थः तथाचाख्यातार्थव्या
पारे वर्त्तमानत्वादेरन्वयाङ्गीकारे अत्र स्त्यर्थे वर्त्तमानत्वादेरुपस्थितत्वात्तत्कृत्यनेलाघवमितिभावः ननु केवलस्य धात्वर्थत्वे ओदनादिरूपपाकफलानुत्पत्तिदशायां तदनुकूलपाकादिरूपव्यापारसत्त्वेपा
कोभविष्यतीतिप्रयोगापत्तिः तत्र निरर्थकत्वसमभिव्याहृतपचधात्वर्थओदनादिरूपफले वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वस्य सत्त्वादित्यत आह भावप्रत्ययत्वजादेरिति भावविहितघञादि
प्रत्ययस्येत्यर्थः अनुकूलव्यापार इति तथाच तत्र भावविहितघञर्थतादृशव्यापारस्य सिद्धतया तत्र वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वस्यासत्त्वादितिभावः अवधितत्वेन तथाप्रयोगापत्त्यसम्भवा
दितिभावः तेनेति भावविहितघञ्प्रत्ययस्यानुकूलव्यापारार्थकत्वेनेत्यर्थः फलानुत्पादयायामिति ओदनादिरूपफलानुत्पादशायामित्यर्थः तादृशफलोत्पाददशायां तु तत्र वर्त्तमानप्रागभावप्रति
योगित्वरूपभविष्यत्त्वस्यौदनादिरूपफले भावेन तथाप्रयोगासम्भवात्तथैवोक्तमिति अनेनानुकूलव्यापारार्थकत्वे पूर्वमन्तरमाह नवेति व्यापारविगमे पाकादिरूपव्यापारविगमेऽत्यर्थः पाकोविघ्नत इ
ति प्रागुक्तरीत्या धात्वर्थओदनादिरूपफले वर्त्तमानकालसम्बन्धित्वरूपविद्यमानत्वस्य सत्त्वेन तथाप्रयोगापत्तिसम्भवादितिभावः भावविहितघञादीत्यत्राहि पदग्राह्यस्यानुकूलप्रत्ययस्य व्यापारार्थकत्वेपु
क्तिमाह नापीत्यादि अत्र भावप्रत्ययस्य निरर्थकत्वे संयोगरूपफलमात्रस्य गमधात्वर्थत्वेन तस्य च अनुभूतलोमयहति न याह्यरम्भूततयो मिथो यमनमिति प्रयोगाप त्तिरिति रैवेतिनस्य न्यापार्थक ९
त्वमावश्यकमितिभावः ननु एवं तस्मिन्नेकर्मकत्वं धात्वर्थतावच्छेदकफलशालित्वं फलस्येतरन्निष्ठधात्वर्थतया धात्वर्थतावच्छेदकत्वाभावेन तथात्वसम्भवस्यासम्भवयुक्तिकत्वात् नापि परसमवेतव्यापारजन्य
धात्वर्थफलशालित्वं तत् प्रकामानं प्रयातीत्यविहगः इतिप्रयोगापत्तेः विहगस्यस्वपरोपयः स्वावयवत्वसमवेतो यः स्वात्मकव्यापारस्तज्जन्यधात्वर्थसंयोगाश्रयकफलशालित्वादित्यत आह प्रत्ययोप
नीतेति प्रत्ययोपनीतो यः परसमवेतव्यापारस्तज्जन्यं यद्धात्वर्थफलं तच्छालित्वं तस्मिन्नेकर्मतामित्यर्थः तथा विधस्वात्मकव्यापारस्यप्रत्ययोपनीततयाभावेन तस्मात्प्रयातीतिविहगइतिप्रयोगयुक्तः

नचात्रव्यापारपरत्वं वाच्यमिति वाच्यम् व्यापारत्वेन प्रत्ययोपनीतत्वप्रामाण्येन तस्योपादानात् अन्यथा वर्तमानत्वं वादिना प्रत्ययोपनीतो यः परसमवेतकालोपाधिस्तज्जन्यधात्वर्थफलशालित्वेना
ऽनेनापि कर्मत्वसम्भवेन स्वात्मानं प्रयाति विद्वानिति प्रतीत्यापत्तेः नचात्र व्यापिया तदर्थत्वमर्थं गच्छतीत्यादौ पूर्वदेशस्यापि कर्मत्वापत्तेः तथापि प्रत्ययोपनीतो यः परसमवेतव्यापारस्तज्ज-
न्यफलविभागस्तच्छालित्वात् तदुपादाने च न तथात्वापत्तिः तस्य धात्वर्थत्वाभावात् अन्यत्र परसमवेतत्वं कर्मप्रत्ययार्थः तस्य च कर्त्राख्यातस्थले ऽनाख्याताऽर्थव्यापारे कर्माख्यातस्थले च ति-
वै॰ ङ्प्रमितेतरनीयार्थव्यापार एवान्वय इति परे तु धात्वर्थतावच्छेदकतासम्बन्धेनैव प्रयत्नवैशिष्ट्ये तदर्थत्या धात्वर्थोपाधिकरणतासम्बन्धेनैव प्रयत्नान्वेति नतदर्थत्वया च बोधम् इत्थं च ग्रामं गच्छतीत्यादौ
ग्रामवृत्तिसंयोगजनकक्रियाभिन्नसमवेतव्यापारकं चैत्रं चैत्रो नेत्याद्यामोगम्यतेइत्यंचैव वृत्तिग्रामभिन्नसमवेतव्यापारजन्यसंयोगशालीग्राम इति बोधः नतु कर्त्राख्यातकर्माख्यातयोः कोपि
र्वत्वरूपे कथमीवच्छिन्नबोधकत्वे कथमेककर्तृप्रत्ययः कर्मप्रत्यय इति व्यवहारस्तत्राह फलव्यापारयोरिति तथाच फलस्य विशेषणत्वे व्यापारस्य विशेष्यत्वे कर्तृप्रत्यय इति व्यवहारः एवं
फलस्य विशेष्यत्वे व्यापारस्य विशेषणत्वे व्यापारस्य च कर्मप्रत्यय इति व्यवहार इति भावः ननु कर्माख्यातस्थले धात्वर्थफलस्य साक्षात्प्रामार्थेऽन्वयबोधाङ्गीकारे नामार्थधात्वर्थयोः साक्षाद्
दान्वयबोधो नाङ्गीक्रियत इति व्युत्पत्तिभङ्गप्रसङ्ग इत्यत आह वस्तुतस्त्विति अधिकरणत्वमित्यादि प्रथमान्तपदस्य पदार्थोपस्थितिं विना पदार्थस्यानेनान्वयः न तु कर्माख्यातवत्कर्मकर्तृबोधः प्रत्यय बोध
कत्वेन स्वाकामार्थेऽन्वयप्रसङ्गः नामार्थयोर्भेदेनान्वयबोधस्यानङ्गीकारादित्यत आह कर्मकर्तरीति आश्रयत्विति फलस्येत्यादिः कर्तृकृतो यत्नाश्रयबोधकत्वे प्रकारबोधजनकत्वरूप
र्थमात्वेनास्यापि यत्नत्वविशिष्टप्राकत्वापत्तिरित्यत आह कर्तृकृतरिति कर्तृकर्मत्यादि उपदर्शितोभयस्थले कर्तृकर्मभांसहकृतसत्यपाथी मेदान्वयबोधस्यानुभवसिद्धस्यानुरोधादित्य
र्थः ज्ञानात्मादिप्रयोग इति आख्यातकर्मकर्तृकत्वामिति शेषः पतीके ऽपि पती हीरिति आश्रयत्वे विषयत्वे कर्त्राख्यातकर्माख्यातयोरप्यविषयोचकर्तृकर्मकलोरर्थपरमर्थः स्वविषयपत्वेऽसा
दि पचतरस्तदव्यापारस्याख्यातार्थत्वाभावात्फलेवर्तमानत्वान्वयबोधाङ्गीकारे व्यापारासत्त्वदशायां फलसत्त्वदशायामपि पच्यते इत्यादिप्रयोगापत्तिः एवं पक्वस्यादावाख्यातस्याभावेऽ‍वतद-
र्थव्यापारेऽतीतत्वस्यान्वयाङ्गीकारे फलसत्त्वदशायां व्यापारनाशदशायां पक्वत्वे तुल इति प्रयोगानुपपत्तिश्चेति भावः वर्तमानत्वादीत्यादिनाऽतीतत्वादिपरिग्रहः ननु पच्यमानस्यापि दशायां चान्वय
यार्थैकदेशे व्यापार एव तदर्थवर्तमानत्वादेरन्वयः स्वीकर्तव्यः तथाच पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिभङ्गः स्यादत आह पच्यमानस्यादि तथाच प्रकृतस्थले नाहरणमनुष्ठानेः सङ्को
चः कल्प्यत इति भावः सर्वेच नाद्दशा व्युत्पत्तिस्वीकारे नाह लोकेति नत्वेवसतित्वव्यापाराश्रयतायां बोधस्यानुभवसिद्धत्वादापत्तेरप्रसङ्ग इत्यत आह विशिष्टमिति आश्रयतासम्बन्धेन व्यापारवि
शिष्टाश्रयत्वमित्यर्थः अन्वयबललभ्यमिति एकपदोपस्थापितयोरर्थयोः परस्परमन्वयबोधाङ्गीकारे लाकुलाकारलाभवसिद्धत्वाद् बोधविषयत्वमर्थः तथाचैकपदोपस्थाप्ययोस्तयोः
परस्परमन्वयबोधबाधकाभावेन तादृशविशिष्टार्थबोधोऽनानुपपन्न इति भावः नन्वेकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधाङ्गीकारे सिद्धेऽप्यमानाभावस्यत आह एवकारस्येति त
थाचैकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधाङ्गीकारेऽपि धर्मनिरूपणं च धात्वर्थत्वेन च योगव्यवच्छेदबोधोऽनुपपन्नः एवकारस्यान्ययोगव्यवच्छेदे च प्रत्येकं शक्तिरियं स्वीकारे लोपदर्शि- एव तथाचैकपदर्शितात्वपबोधोऽनुपपन्न इत्याह अन्ययोगेत्यादि अन्ययोगप्रतियोगिकत्वविशिष्टव्यवच्छेद
तानुपपत्तिरस्तत्वादिति भावः नन्वेवकारस्यान्ययोगप्रतियोगे शक्तिरस्वीक्रियते विशिष्टयोगप्रतियोगिकत्वविशिष्टव्यवच्छेदेऽभ्युपगमसाम्यर्थः अतिप्रसक्तत्वादिति सर्वसाधारण्यत्वादित्यर्थः तथानुपपत्ति-
रेव धर्मचेदरस्यादिविवेचनैव यत्र वदस्यादिप्रयोगापत्तिः चैत्रान्ययोगमतुदेवमयचयवच्छेदस्यचैत्रान्ययोगप्रतियोगिकस्य धर्मचेदरेव धमानत्वादिति भावः नन्वन्ययोगत्वावच्छिन्नप्रतियोगिकत्वावच्छिन्न-
प्रतियोगिताकव्यवच्छेद एव एवकारार्थः तथाचन चैत्र एव धनुर्धर इत्यादिप्रयोगः पार्थ एव धनुर्धर इत्यत्र चैत्रान्ययोगस्याविद्यमानत्वाद्धनुर्धरत्वावच्छेदे चैत्रान्ययोगत्वावच्छिन्नाभावात्सत्त्वादत आह दोष
माह अन्ययोगत्वावच्छिन्नेत्यादि अन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य पाण्डुतदेवश्च बाध प्रसिद्धिः पार्थ एव धनुर्धर इत्यादौ अन्यतासम्बन्ध
त्वावच्छिन्नप्रतियोगिताकाभावरूपस्याप्रसिद्धिः पृथिव्यामेव गन्धस्याद्यसमवेतत्वावच्छिन्नाभावरूपताकाप्रसिद्धिदोषो नसम्भवति अन्यसमवेतत्वस्य प्रसिद्धिसम्भवादनन्तरदोषमाह वस्तुतस्तु
चेति पृथिव्यामेव गन्धस्याद्यसमवेतत्वाभावस्यतया बाधितत्वेन बोधसम्भवात् एवं पार्थ एव धनुर्धरस्याद्यन्यतादात्म्याभावाप्रसिद्धौ वयि पार्थान्यतादात्म्याभावस्याप्रसिद्धिसम्भवेन बोध
बाधितत्वं चेत्यर्थः ननु तत्र गन्धेऽन्यसमवेतत्वावच्छेदस्य बाधितत्वेऽपि पृथिव्यन्यसमवेतत्वाभावस्य ॥ २१ ॥ चैत्रान्यपार्थधनुर्धरतादात्म्यसम्भवात्
जलादिवृत्तित्वपृथिवीसमवेतत्वात्

नीतत्वस्य बोधरतिवक्त
मध्याव्यवच्छिन्नधात्वर्थफलेः

आ॰ वा॰ टी॰ १०

10

सम्भवादतो हेत्वन्तरमाह पार्थ एवेत्यादावपीति तस्य पार्थान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य ततोऽन्यत्वात् एवकारार्थान्यतावच्छेदकावच्छिन्नस्यैवपदाद्युपस्थितिसम्भवेन
एवकारार्थान्यतादात्म्यव्यवच्छेदस्य प्रत्ययासम्भव इति भावः ननु स्वान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावादावेवकारस्य शक्तिः कल्पनीया अत्र स्वपदं यत्पदसमभिव्याहृतं तद्वि
भक्तिसमभिव्याहृत एवकारस्तत्तत्परं तथा च नोपदर्शितानुपपत्तिरत आह स्वान्येत्यादि स्वत्वस्याननुगमात् पार्थ एवेत्यादि साधारण्येनानुगतस्वत्वस्याभावात् पार्थान्य
योगव्यवच्छेदादावेवकारस्य नानाशक्तिकल्पने गौरवान्नाह तथा चाननुगतशक्तिकल्पनमिति प्रदर्शितप्रकारेऽनादरणीय इति भावः नन्वेवकारस्यान्ययोगव्यवच्छेदे च नानाशक्तिवादिमते
कथं पार्थ एव धनुर्धर इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदबोध इत्यत आह तस्मादिति यथा नीलो घटो नास्तीत्यादौ नीलत्वावच्छिन्ने नीलस्यान्वयेन नीलत्वावच्छिन्नाभावः प्रतीयते तथा पार्थ एवे
त्यादावेवकारार्थान्यैकदेशे भेदे पार्थस्यान्वये नान्यस्य च योगेऽन्वयेन योगस्य च व्यवच्छेदेऽन्वये न पार्थान्यतादात्म्यव्यवच्छेदः प्रतीयत इति समुदितार्थः ननु कर्तृकृदर्थव्यापाराश्रयैकदेश
व्यापारे वर्तमानत्वाद्यन्वयस्वीकारे मग्ने नमने पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिसङ्कोचापत्तेर्दोषः व्यापाराश्रययोस्तस्य नानाशक्तित्वे चाननुगतशक्तिकल्पनाप्रसङ्गोऽत आह
समानेत्यादीति तथा चाख्यातस्य कृतिवत्कृतो शक्तिवादिनामपि कर्तृकृदर्थकव्याश्रयैकदेशे कृतौ वर्तमानत्वादेरन्वयाभ्युपगमे उपदर्शितव्युत्पत्तिभङ्गः कर्तृकृतः कृतौ आश्रये च शक्तिद्वयस्वीकारे
नानाशक्तिकल्पनाप्रसङ्गोऽव्ययमभ्युपेयमिति मतद्वयमिति भावः नव्याख्यातकर्तृकृतो व्यापारतदाश्रययोः शक्तत्वे संयुक्ताः संयुक्त इत्यादावपि तथैव वक्तव्यतया सुज्यताम् सकर्मकत्वापत्तिः प्र
त्ययोपनीतधात्वर्थानुकूलव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्र सत्त्वाद् दोषसम्भवादत आह धात्वर्थेत्यादि तथा च तत्र प्रत्ययस्य व्यापारार्थकत्वे तथाविधव्यापारविरहितत्वेन तादृशप्रत्य
यानुपपत्तिरिति भावः ननु हस्तवदात्मसंयोगादिरूपव्यापारस्य तत्र सत्त्वाद् दोषसद्भावस्तथैव तत्र तथाविधव्यापारविरहस्य प्रसिद्धत्वादिति संयुज्यत इत्यादौ प्रत्ययस्य व्यापारार्थकत्वेनोक्तानुपपत्तिरतो
हेत्वन्तरमाह संयोगमात्रप्रतीतश्चेति मात्रपदेन व्यापारव्यवच्छेदः तथा च तथासति तत्र व्यापारस्याप्रतीत्या न सकर्मकत्वमिति व्यापारस्य प्रत्ययोपनीतत्वाभावेन प्रत्ययोपनीत
तादृशव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्र कालेऽप्यभावान्न सकर्मकत्वमिति भावः ननु तज्जो व्यापारार्थकत्वे भावे चाज्ञिनि च व्यासनविरोधः नाह प्रत्ययानुशासनेन तत्रः प्रयोगसाधुत्वमात्रप्रती
तेरत आह संयोगस्येत्यादाविति तथा च तादृशानुशासनमेतत्स्थलाभिप्रायकमिति न दोष इति भावः तत्रेत्यादि ननु लतेत्यादौ व्यापारानुभवोत्पादने लाघववादिना त्वमेवाख्यातशक्यतावच्छेदकं
युक्तमिति भावः मतद्वये दोषान्तरमाह फलेति तथा च पाकानुकूलसाधारण्यव्यापाराभाववति ग्रहणादित्रपसाधारणव्यापारवति शुकादौ पचतीत्यादिप्रयोगप्रसङ्गो मतद्वयेऽपीति मतद्वये तु वा
इति भावः ननु साधारणजनकताव्यापारस्याख्यातार्थकत्वे नोक्तदोष इत्यत आह विभागादीति चलतीत्याद्यापत्तिः सम्भवतीत्यतो निष्पन्दादौ विभक्तप्रभाकरमतमुपन्यस्यन् दूषणमाह
तत्रेत्यादिना तत्तत्रगच्छतीत्यादौ तत्तत्फलेति संयोगविभागादीत्यर्थः कश्चिदाश्रयतादिकमपीति भावाख्यातस्यैव आश्रयत्वादेरभावात् क्वचिदिति प्रसङ्गादिति लत्वादिना ल
क्षणानुभवोपपादनेन लाघवतनकं स्येव प्रागरतीकरणीयत्वादिति भावः ॥ कविनाख्यातवादेषु मम ग्रन्थविलोकनैः लीलया धापयेद्धीरः कुर्वन्तु निद्रितानपि १ आख्यातवादसद्व्याख्या
समुद्भूतयशमैर्मम प्रीततां जगतीनाथः प्रयाति नन्दरविग्रहः २ ॥ इति श्रीरघुदेवभट्टाचार्यविरचिताख्यातवादटिप्पनी समाप्ता ॥

१०